# कृष्णगीति
# KRISHNAGITI

मानवेद
Manaveda

The texts of *Krishnagiti* and Totayam are taken from *Krishnanttam* (*Krishnagiti*) with Malayalam translation and an extensive introduction by P. C. Vasudevan Elayath, Guruvayur: First published, 1965. Re-published by Guruvayur Devaswom, first edition, 1986; second edition, 2008.

ITRANS version prepared by A. Purushothaman, purushu55@gmail.com

Devanagari version prepared by A. Harindranath using the latex-sanskrit package of Charles Wikner

If you find any errors, send corrections to A. Harindranath,
harindranath_a@yahoo.com

(2012-2014)

# Contents


Text of तोटयं ... i

1 अवतारः ... 1

2 कालियमर्दनम् ... 34

3 रासक्रीडा ... 62

4 कंसवधः ... 101

5 स्वयंवरः ... 122

6 बाणयुद्धम् ... 139

7 विविदवधः ... 159

8 स्वर्गारोहणम् ... 172

# Text of तोटयं

नाट्ट - चेन्प

महितगुणसदन जय महितवरभवन जय
विनुतसुरदनुज जय जय गिरिशसूनो
कर्णभवमन्दमरुतापहृततापहर
ताण्डवजतापहर जय गिरिशसूनो
शुण्डाञ्चलेन भुवि ताळानुकूलतर-
हेलाविलोल हर जय गिरिशसूनो

नारायण नरकान्तक नारक-
पारायणहरचरणसरोजं
मुरहर मुहुरपि नाथ नमामो
मुरहर मुहुरपि नाथ नमामो
दामोदर ते दनुजरिपो जग-
दामोदर ते चरणसरोजं
मुरहर मुहुरपि नाथ नमामो
मुरहर मुहुरपि नाथ नमामो

विमलतरहार हे विपुलकरुणानिधे
विदितमथतापहर जय गिरिशसूनो

# One

# अवतारः

मङ्गळं

श्लोकं

जगतिसुकृतिलोकैर्नन्दिताऽनन्दिताशा
कळविरणितवंशीभासमानाऽसमाना
पशुपयुवतिभोग्या देवतादेवता सा
सजलजलदपाळीमेचका मे चकास्तु १

गुरुवन्दनं

श्लोकं

प्रेम्णालं लाळ्यमानः सदयमिह सदानन्दसंज्ञेन पित्रा
रामेण ज्यायसा वा विवशमतियशोदाख्यया वा जनन्या
आदीव्यन् दिव्यगव्या विबुधपरिवृढोरिष्टदाताऽघमोक्षं
पुष्णन् कृष्णो गुरुर्मे परमतमपदोद्भासको बोभवीतु २

कथारम्भमङ्गळं

श्लोकं

सौवर्णात्भुतभूषणोज्ज्वलवपुः संवीतपीतांबरो
नीलांभोधनिभो भुजैर्धृतगदाशंखारिपङ्केरुहैः
भ्राजिष्णुर्गुरुवायुमन्दिरविरोचिष्णुः स विष्णुः स्वयं
धृष्णुर्विश्वजनोपतापहरणे काव्यं मम ख्यापयेत् ३

श्लोकं

विक्रान्त्याक्रान्तविश्वद्विषत इह गुरोर्विक्रमाख्यस्य राज्ञः
स्वस्रीयो मानवेदो मुरमथनकथावर्णनालोभनुन्नः
विष्णोर्वृष्णीश्वरस्य प्रथयति पदरूपेण किञ्चित् कथां तां
कान्तां विश्वव्यथान्तामिहविबुधजनाः सन्तु सन्तोषवन्तः ४

कथारंभं

श्लोकं

लक्ष्मीनाथ पुरा सुरासुरमृधे ये कालनेम्यादय-
स्त्वत् पिष्टा अपि शिष्टकर्मबलतो दैत्या न मुक्तिं गताः
तेषां भूरिभरेण भूतलजुषां सा भूतधात्री व्यथा-
पात्री वेधसमेत्य वेगत इति प्रोवाच देवावृतं ५

पदं पाटि - चेन्पट

त्रपयालपितुमनीशामपि मां
व्यसनभरो हि कथापयतीमां
वनितानामिह वचनं परुषं
विषहेथा मम रुगधिकपरुषं

पल्लवं

नाथ कृपालय परिपालय मां
पापनृपालकरचिताधिमिमां

निगदितमिदमयि निशमय च विधे
शुचमिह मम शमय च शमजलधे
वनितावच इति न वचो हेयं
मम, किमु गव्यं शकृदिति हेयं - नाथ

स्वशिरो न तु शक्नोति स विनतं
पन्नगपतिरुन्नेतुं नियतं
कमठाधिपमपि महितं भुवने
नकुशलमयि मन्ये मम वहने - नाथ

कुलशिखरिकुलं खलु बत पतितं
सपदि भवेदधिजलनिधि नियतं
गतिरसि मम तु; चकोरी शरणं
कमयति जगति विना हिमकिरणं - नाथ

व्यसनमनोपममुदितमनूनं
मम तु मनोगतमधुना नूनं
परममुतो नतजगदवनरते
प्रभुरिह तु भवान् ननु भुवनपते - नाथ

श्लोकं

उर्वीं गुर्वीं वहन्तीं विपदमिति वदन्तीं पतन्तीं पदान्ते
पश्यन् बाष्पं वमन्तीं त्वयि स कृतमना व्याजहाराधिहारः
वत्से सर्वंसहे त्वं क्षणसमयमये साध्वि सर्वंसहेथाः
लक्ष्मीनाथः स साक्षाज्जगदवनकला दीक्षितो रक्षिता नः ६

श्लोकं

एवं व्याहृत्य शर्वादिकविबुधजनैः साकमुर्व्या च तीरं
क्षीरांभोधेस्तवोरस्थलधृततुळसीसौरभीलोभनीयं
गत्वा नत्वा च स त्वामजित पुरुषसूक्तेन भक्त्योपतस्थे
यावत् तावत्समाधौ दिवि तव गिरमाकर्ण्य मोदादगादीत् ७

श्लोकं

हे देवा देवदेवेरितमतिरिदमावेदये दानवारेर्-
लीलासाहाय्यहेतोर्ज्जगति यदुकुलं तन्वतो धन्यधन्यं
साकं नाकाम्गनौघैरवतरत जवादेवमादिश्य गोभिर्-
गामाश्वास्याप्तगेहो भवदवतरणात्युत्सुकोयं न्यवात्सीत् ८

श्लोकं

त्वत्सानिध्येन धन्ये पुर इह मथुरानामके देवकीं तां
पाणौकृत्याथ शौरिर्व्यचलदतिनृशंसेन कम्सेन साकं
आदायाकाशवाण्या क्रुधमपि च कृपाणीं कृपां स्वां त्रपां वा
हित्वेमां हन्तुकामं यदुपतिमयमालोक्य वाक्यं बभाषे ९

पदं २ सामन्तमलहरि - चेम्प

वसुदेव

अनृशंस ननु कंस वसुधाभृतवतंस
कथमिति व्यवसितं बत कृपाकुलमते
त्वयि विदितवेद्ये किमुपदेश्यमन्येन
तदपि मे मुखरतां प्रणयिता वितनुते

पल्लवं:

वरमते साहासान्ननु विरम नरपते
परमतेजोनिधे सपदि बत यदुपते

वपुषैव सह मृत्युरिह जायतेऽचिरा-
दतिचिरादपि च वा मृतिरियं सुनियता
किमनित्यतासदननिजतनोरपि कृते
विदधते परहतिं निजहिते नृप रता - वर

स्वसृहतेरवितेन जीवितेन किमु ते
निजनाशतो यशो वरमिह तु भूतले
उदयति सदा जगन्मदयति यशोमयश-
शाङ्के कळङ्कोऽद्य नोदयेतामले - वर

वनितावधो निखिलकुशलानि नाशये
दिति नीतिमयि फलय न तु विबुधविरचितां
बहुमतो बहुशोपि विबुधविजयेन ते
धर्म्मपालो ननु परामृशेन्न वनितां - वर

दयनीयतरजने भवतीयमतिरन्य-
रूपैव; ननु मनो विमलय विमर्शनात्
विपदां हि विवरमविचार इति बुधवचो
विस्मृतं किमु विभो विदितमपि दर्शनात् - वर

त्वधीनमतिदीनमपराधलवहीन-
मंमिताधिभरलीनमतिभीतिभाजनं
निजशिशुजनं विवशमपकरुणमुपयमं
नय न पुनरुपयमे बत जातवेपनं - वर

हितमिदं निगतितं शङ्कां न हरति चेत्
परमपि मतं परमकरुण शृणु पुनरिदं -
ननु सुतान् दातास्मि यत एव तव भयं,
नृप रुषं त्यज, परुषमयि कुरु हृदुरुमुदं - वर

श्लोकं

शौरेस्त्वदाहितमतेः किमु वाक्यभंग्या

किं देवकीसुकृतपुञ्जविजृम्भितेन
कंसस्तथेति तसैव तदीयवाच-
मूरीचकार च, चकार च हन्त चिन्तां १०

श्लोकं

सत्या किमेषा वसुदेववाणी
तथ्या किमेषा गगनोथवाणी
कालेन चैतन्निखिलं यथावत्
ज्ञायेत तत् सम्प्रति संप्रतीक्षे ११

श्लोकं

एवं विचिन्तयन्नेव विविधं विवशाशयः
विवेश स पुरं विष्णो विदूषितमनास्त्वया १२

श्लोकं

भोजाधिपात् स हरिणीं हरिणारिवर्य-
पाणीद्वयीमहितपञ्जरतो यथा तां
धीमान् विमोच्य तरुणीं कृपणां कृपाण-
पाणेर्भवत् प्रहितधीर्गृहमाप शौरीः १३

श्लोकं

कंसो यथोदितमथो तव तातनीतं
तम् सोऽवधीन्न कृपया निज भागिनेयं
आदाय नन्दनमुदारमना निकेत-
मागम्य शौरिरखिलं निजगाद जायां १४

श्लोकं

धन्येयं नारीदं वाक्यं
श्रुत्वा स्मृत्वा चैतद् वृत्तं
विद्युन्मालाभिख्यं पुत्रं
दृष्ट्वा चासीत्तुष्टा विष्णो १५

श्लोकं

तावच्च नारदमुनिर्मधुरापुरीं तां
आगच्चदाशयमयं भवतो विदित्वा
कंसं शशंस च नृशम्समलम् प्रशंसं-
स्तं सन्निविष्टमतिहृष्टमतिं सभायां १६

श्लोकं

दैतेया यूयमेते यदव इह सुरास्त्वद्वधायैव विष्णुः
प्रादुष्योदेवमुक्तो विदुत यदुकुलः पञ्चतां षड्नूजान्
प्राणैषीदेष शौरेर्निभृतमहिपतावाहिते माययाथो
रोहिण्यां देवकीं तां त्वमपि समविशो देव हे देवहेतोः १७

पदं ३ भैरवि - चेन्पट

परिपाण्डुपयोधरभरभासा
शरदिव शुशुभे तदनु शुभा सा

पल्लवं

मञ्जुळदोहृदमन्दिरभूता
कथमिव कथनीया तव माता

कृशतरमुदरं गरिमपरीतं

विबुधव्यसनमतो विपरीतं - मञ्जुळ

स कुचो मलिनमुखोऽतिकठोरो
यदुपवदजनि विमुक्ताहारो - मञ्जुळ

वजहौ सा भरभयतो भूषा-
मथ केवलतैवाजनि भूषा - मञ्जुळ

अदसीयमहो निभृतं हसितं
मृदुलं च गतं भृशनिःश्वसितं - मञ्जुळ

अवलोकितुमिव तव ललितमुखं
कुचयुगळमभूदथ विनतमुखं - मञ्जुळ

श्लोकं

आशां पाकरिपोः प्रसाधिततमामापादयन्नादरा-
दालंबो विबुधावलेस्त्रिजगतामेकावतंसो हरे
मन्दं मन्दमहो वहन् निजतनोरापूर्णतामन्वहं
सोयं दौहृदपार्वणेन्दुरिह नो कंसप्रमोदं व्यधात् १८

श्लोकं

भवदेकाललंबा सा वसुदेवकुटुंबिनी
आललम्बे परां शोभां जितदेन्नितंबिनी १९

श्लोकं

कंसस्त्वापन्नसत्त्वामिह निजसहजां शोकदामेकादा तां
त्वत्सान्निधोत्थतेजःप्रसरभृशपरिध्वस्तनेत्रप्राचारां

निध्यायैवं स दध्यौ किमु कुसृतियुतः कोप्यसौ कृष्णसर्पो
मत्प्राणैः पारणाय स्वसुरुदरगुहामध्यमद्याध्यवासीत् २०

श्लोकं

मन्नाथायां हतायां स्वसरि च युवतौ धर्मपत्न्यां च शौरे-
रन्तर्वत्न्यामकीर्तिर्मम तु सहचरी नूनमाजीवनान्तं
हा हन्ताहिंसितायां पुनरिह सहसैवार्भकः कोप्यमुष्याः
प्रादुर्भूतः करिष्यत्यसुरवरचमूघस्मरो भस्मसान्मां २१

श्लोकं

एवं दोळायितात्मा नरपतिरजिघांसाजिघांसाभिभूतः
पुत्रं तस्याः प्रसूतं प्रसभमिह निहन्तास्मि हन्तास्मि नूनं
इत्थं निश्चित्य दुस्थाशय इहशयने भोजने सोऽथ याने
स्नाने वा संस्मरं स्त्वां प्रतिपुरमवसत् तत्प्रसूतिप्रतीक्षः २२

श्लोकं

चतुर्मुखमुखा बर्हिर्मुखाः फुल्लमुखांबुजाः
तुष्टुवुस्त्वां तदा तुष्टा निविष्टमुदरे हरे २३

पदं ४ सौराष्ट्रं - चेन्पट

बोधमयाव्य लोकहिताय हि भजसे रूपमनन्तं
यत्स्मरणादपि भवसागरमिह सपदि तरन्ति दुरन्तं

पल्लवं

याम इमे शरणं त्वां यदुवर
याम इमे शरणं त्वां

त्वयि विमुखानां पतनं सुनियत-

मपि सुमहितपदभाजां
क्वापि कुतोपि न हानिरिहाजित
तव सुलळितपदभाजां - याम

त्रिभुवनसाक्षी भजतेऽजित तनु-
गुणकृतिमरणभवान् नो
तदपि च तान् निजभजनाय भजति
भजतामरण भवान् नो - याम

स्मरणस्मारणनिकथननिशमन-
मयि तव खलु ननु नाम्नां
जगति वितन्वञ्जनिमृतिमेता-
मेति न सुमहितधाम्नां - याम

भवहर तनु ते भवपाथोदिं
भरिताधिकमहिताधिं
गोवत्सपदं त्वयि तु समाधिं
विदधद्विहत समाधिं - याम

मुरहर खलनृपकृतभूभारं
व्यपहर सहसोधारं
माधव मान्द्यं ननु तनुया नो
परिपालय तरसा नो - याम

श्लोकं

नुत्वा नत्वा गते त्वामिति विबुधगणे प्रावृताशा पयोधैः
प्रावृट् प्रादुर्बभूव प्रकटरसमुपानीततत्तत्पदार्था
अत्यासन्नप्रसूतिं सपदि परिचरन्तीव हन्ता सहाया-

मेनामत्यन्तदीनामिह पुनरनुकूले विधौ को न बन्धुः २४

श्लोकं

कृष्णाभिख्या जगत्यां प्रचुरतरतमोवर्धने बद्धदीक्षं
व्यादीवत्पुष्करास्यं भुवनमहितमारात्कृतार्कप्रकाशं
जाया शौरेरुदीते शिशिररुचि निशीथे जयन्त्यां भवन्तं
प्रादुश्चक्रेऽथ चक्रायुध वियति यथा प्रावृडेषा पयोदं २५

श्लोकं

अक्षीणाभं दयार्द्रैर् मृदुहसितसखैर् वीक्षणैरीक्षमाणं
लक्ष्मीनाथं स साक्षात् परमिह पुरुषं लक्ष्यमक्षामपुण्यैः
त्रैलिक्यादीशमालोक्य च निजतनयं विस्मयस्नेहमोदै-
राविष्टात्माथ शौरिः स दयित इति तुष्टाव पुष्टादरं त्वां २६

पदं ५ कामोदरि - चेम्पट

महितशिरोधृतमणिमकुटं - वर
तिलकविभासितफालं
नतचिल्लीजितवल्लीतति- पृथु-
नयनजितांबुजजालं

पल्लवं

कथये माधव कथमिव रूपं
तव नितरामनुरूपं

त्रिभुवनबन्धुरगन्धवहं - मणि-
कुण्डलमण्डितगण्डं
अधररुगञ्चितदन्तगणं - मुख-

निन्दितपङ्कजषण्डं - कथये

निर्मलकौस्तुभकम्रगळं - लस-
दंसगळितवनमालं
वत्सविराजितवत्सतलं - वर-
हारोदितरुचिजालं - कथये

करधृतदरकमलारिगदं - जठ-
रोषितभुवनकदंबं
केसरभासुरनाभितलं - कपि-
शांबरकम्रनितंबं - कथये

करिवरकमनोरुयुगं - मृदु-
जानुकृताखिललोभं
प्रसृतायुगजितकेकिगळं - प्रप-
दाधृतकमठविशोभं - कथये

वल्गुरुगाततगुल्फयुगं - वर-
नूपुरभासुरपादं
भंगिपदांगुलिपंक्तिधरं - नख-
मणिघृणिधृतविधुपादं - कथये

मृदु-रेखासख-पादतलम् - पद-
नतमतिशोधिपरागं
अमलतमाभतमालनिभं - जग-
दानन्दनिखिलांगं - कथये

दिव्यमिदं खलु तव रूपम् - लखु-
संहर जगदभिरूपं

अयि , मामचिरादव कंसा - दल-
मवमादसदवतंसात् - कथये

श्लोकं

देवकीवसुदेवाभ्यां देव कीर्तिपयोनिधे
एवमीडित एतौ गामेवमीरितवान् भवान् २७

श्लोकं

मातस्तात तपस्यया हि युवयोर्मोमुद्यमानात्मना
प्राग्जन्मस्मरणाय मे वपुरिदं दिव्यं मया दर्शितं
शश्वद् ब्रह्मधियाथवा सुतधिया मां संस्मरन्तौ युवां
क्षिप्रं मत्पदमाप्नुयातममितैः प्राप्यं हि पुण्योत्करैः २८

श्लोकं

नन्दालये नन्दसुतां प्रसूतां
यशोदयाऽऽदाय यशोदयाब्दे
निधाय मां तत्र निधे गुणानां
निषीद चात्रार्य विषीद मा त्वं २९

श्लोकं

शिशुतामितवानभिधाय भवान्
विशदामिति गां पशुपालमणे
प्रणयादधिकं विधुरौ पितरौ
जनितावपि तौ जगतीमहितौ ३०

श्लोकं

विज्ञाय त्वन्मतं त्वां दधदथ गतवान् गोकुलं सूतितल्पे

गूढं विन्यस्य चित्तं त्वयि च स तु यशोदाप्रसूतां सुतां तां
धृत्वा विश्लेषपीडामपि सदनमुपेत्यास्त शौरिः पुरेव
श्रुत्वा कंसो भगिन्याः प्रसवमतिजवदापपातातिपापः ३१

श्लोकं

पाणिपञ्जरगतां स्वसुः सुतां
चारुपञ्कजमुखीं तवानुजां
आर्य देहि चरमामिमामिति
पार्थितोपि जगृहे खलो बलात् ३२

श्लोकं

हस्तादुद्दुत्पत्य सद्यो वपुरनुपममासाद्य च द्यां प्रपद्य
क्रूरात्मन् किं हतायामपि मयि भुवि ते यत्रकुत्रापि वैरी
संभूतो जृंभते यन्निभृतमिति विभो त्वद्भगिन्यां गतायां
सामोक्त्या दम्पती तौ स तु किमपि समाश्वास्य यातो निकेतं ३३

श्लोकं

ततः प्रभातेऽजित निग्रहन्तु-
मिहार्भकाणामधिकप्रभाणां
मदोद्भटान् दैत्यभटान् दुरात्मा
सः पूतनामप्यशिषद्दुराशां ३४

श्लोकं

वलभिदुपलनीलं सूतितल्पे लसन्तं
विद्रुतमृदुपदाब्जम् मुग्धवक्त्रं रुदन्तं
विवशमति यशोदा सा तु दृग्भ्यां भवन्तं
मुहुरपि च पिबन्ती नाप मोदं कियन्तं ३५

पदं ६ पन्तुवराटि - चेन्पट

जगदानन्दन नन्दन जनना
कर्णनतरळात्मा अलं
वदनमुदीक्ष्य पितऽप्लुत आप्लुत-
सादकृत स गोजालं

पल्लवं

व्यदधत किं पशुपा न तदा
तव जननोद्यदुदारमुदा

मागध गाथक वन्दिमुखाखिल
विद्याजीविजनानां
वितान मतिं विततातिमुदं
वितरणतो विभवानां - व्यदधत

अधिसृति विविधं कृतनटनानां
अधिगतरसविवशानां
अभिययुराळय इह पशुपानां
अबलावलिसहितानां - व्यदधत

बालक जीव चिरं पालय खलु
वसुधामिति कृतलापाः
अकृषत वृषगोततिमपि कपिशां
निशया पशुपकलापाः - व्यदधत

सिषिचुर्गुरुशिष्यौ पितृतनयौ

पयसा कुतुकपरीतौ
मिथ इह पतिभृतकौ नवनीतै-
रपि चिक्षिपुरविनीतौ - व्यदधत

अवहन् कतिचन कतिचन पतिता
व्यहसन् कतिचन कामं
व्यनदन् कतिचन कतिचन विदधु
रणविहृतिं च निकामं - व्यदधत

श्लोकं

प्रदातुं नन्दं तं करमथ स कंसाय मथुरां
प्रयातं नन्दंतं भुवनमहितेनात्मजरुषा
प्रकृष्टादृष्टानां प्रवरफलभूतेन भवता
प्रहृष्टो दृष्ट्वा गामवददिति शौरिः स्वसुहृदं ३६

श्लोकं

भ्रातः किं कुशली शिशुस्तव च मे यत्नेन रक्ष्याविमौ
लक्ष्यन्ते सुदुराचरव्रतपदे हन्तोपसर्गा इह
तद्याहीत्युदितो ययौ स कृतपोतापातना पूतना
तावत् संभृतमञ्जुळांगलतिका त्वामाप पापाशया ३७

श्लोकं

सा शायितं त्वां शयने निशाम्य
साशा निहन्तुं जगृहे सहेलं
सौन्दर्यसम्मोहितसर्वलोका
मन्दं जगौ चाऽमलमन्दहासा ३८

पदं ७ नाथनामक्रिय - चेन्पट

अतिलोभनमयि लोचनयुगळम्
मुकुळयसि कुतो रुचिभरयुगळं

पल्लवं

बालक मा कुरु मा कुरु रोदं
मामक मापिब कुचमुरुमोदं

किमपि किशोर निशामय सुत मां
दृशमुन्मीलय कुवलयसुषमां - बालक

विशदय मृदुलं सुन्दरहासं
विहसितविकसितकुन्दविलासं - बालक

क्षुदितोऽसि किमयि पशुपालमणे
पृथुरोचिरपासितदिवसमणे - बालक

कुचतो गळति पयो रुचिसदनं
किमपि विदारय दारक वदनं - बालक

श्लोकं

आभाष्यैवमपाययत् कुचमियं प्राणैः सहास्यास्त्वया
प्राणोन्मोचकमाशु चूचुकमहो पीतं कृतं मेचकं
प्राणाकर्षणदीर्णमर्मनिवहा प्राप्ता भृशं वेदनां
प्रापद् घोरतरां तनुं प्ररुदती प्रावोचदेवं च सा ३९

पदं ८ इन्दिश - चेन्पट

हन्त सुत किं त्वमिति सन्तपसि हन्त मा-
मन्तरितबन्धधृतिसन्ततिमिमां

पल्लवं

मुञ्च बत मुञ्च बत किञ्चन कुचं
डिंब मम दंभहर संभृतशुचं

सञ्चलसि किञ्चन न वञ्चनरतान्वहं
हन्त ननु वञ्चिताऽवञ्चिताहं - मुञ्च

संप्रति तु सन्पतितसंभरितसंभ्रमा-
मञ्चति रुगञ्चितां पञ्चता मां - मुञ्च

शिथिलनिखिलेन्द्रिया पृथुलहृदयव्यथा
परिपृथिवि बत पताम्यहमनाथा - मुञ्च

श्लोकं

विवृत्तनेत्राथ विकीर्णकेशा
विमुक्तनादप्रतिनादिताशा
पदौ भुजौ केशव सा विसार्य
पपात भूमौ सह पादपौघैः ४०

श्लोकं

व्रजपदे श्रुतिदारणदारुण
स्वनितजातभयाकुलवल्लवे
व्रजपतेर्दयिता कृतलेखनम्
तदुपरीह भवन्तमुपाददे ४१

श्लोकं

गत्वा घोषं स घोषं व्रजपतिरशनैरक्षताङ्गः सुतोऽसौ
दिष्टया दिष्टानुकूल्यान्नियतमपगतो मृत्युवक्त्रादिति त्वां
आदायालिङ्ग्य रम्यं वदनसरसिजं वीक्ष्य वीक्ष्यापि चुंबन्
ब्रह्मानन्दे निमग्नः स तु सुकृतनिधिर्नैव किञ्चित् व्यजानात् ४२

श्लोकं

जन्मर्क्षे त्वं जनन्या मुरहर शकटाधस्तले शायितस्तत्
पद्भ्यां क्षिप्त्वाथ वात्यावपुषमपि तृणावर्तदैत्यं व्यदारीः
गर्गं भर्गोपमानं व्रजपतिरवलोक्याव्रजन्तं व्रजं तं
तेनैवातानयन्नाम स मुसलभृता ते बतानन्त नाम्नः ४३

श्लोकं

नन्दपाक नृणां पुण्यवृन्दपाक विभो भवान्
मन्दमैधत घोषं स्वैर्नन्दयन् ४४

पदं ९ आहरि - पञ्चारि

बाल सोमभासमानफाललोलनीलबाल-
जाललळितवदनगळितलालयाकुलाकृते

पल्लवं

शैशवं तु तव विलोभनं पशुपतनय
शैशवं तु तव विलोभनं

लक्ष्यमाणरदनमुकुळ-
वीक्षणीयमृदुलहसित-

वीक्षणातिविवशहृदय-
विश्वकामिनीतते - शैशवं

रोदणेषु मषिमलीम-
सातिदीनमुखसरोज-
लोकनेषु मुषितघोष-
योषितावलीधृते - शैशवं

नियमहीनहासरोद-
निरुपमाननावलोक-
निरतिशायनोरुमोद-
विवशगोपसंहते - शैशवं

अङ्गसङ्गसङ्गताङ्ग-
नाजनेन नीयमान
सार्द्रं करात् करं
गृहात् गृहं रमापते - शैशवं

अस्फुटाक्षरातिरम्य
जल्पितामृतैकसेक-
कल्पितोरुपुण्यलोक
कर्णमोद सत्पते - शैशवं

संक्वणत्स्वकङ्कणोरु-
किङ्किणीकमङ्कणेषु
रिंखणेन पङ्कसंग-
तांग सुमनसां गते - शैशवं

विश्वमपि तवास्य एव
विश्वमजित वीक्ष्य देव
विस्मयातिविह्वलीकृ-
ता प्रसूरसौ च ते - शैशवं

पाणिजानुचंक्रमे तु
नूपुरारुतोदये कि-
मेतदिति मुहुर्विवृत्य
वीक्ष्य विहितलघुगते - शैशवं

बाल मातुलं विलोक-
येति मातृकथितमिन्दु-
माजुहोथ, तारकाभि-
रपि स सविधमाप ते - शैशवं

दर्पणोदरेऽम्गमखिल-
तर्प्पणं निजं निशाम्य
सप्रमोदमर्भकेति
चाह्वयो जगत्पते - शैशवं

श्लोकं

स्वामिन् नन्दात्मजन्मन् निरुपमसुखसन्दोह सन्दोहनात्मन्
साकं लोकाभिरामेण च दनुजविरामेण रामेण तेन
वेलातीतप्रमोदस्तिमितपशुपनारीदृशैरीदृशैत्वं
हेलाजालैरुदारैरविरतमतनोराकुलम् गोकुलं तत् ४५

श्लोकं

गोपोपनीतनवनीतपरीतपाणिं

त्वां द्वीपिदिव्यनखदीपितकण्ठभूषं
वन्दे दराङ्कुरदुदाररदाभिराम-
वक्त्रेन्दुकन्दळितसुन्दरमन्दहासं ४६

श्लोकं

लोलंबावलिलोभनीयसुषमं लोलं विहारे वधू-
जालं व्याकुलयन्तमस्फुटगिरं व्यालंबिकाञ्चीगुणं
आलंबं जगतां मुखांबुजगळल्लालं गळान्तोल्ललद्-
बालं त्वां हरिदंबरं मम मनोबालं बतालंबते ४७

श्लोकं

धन्यं स्तन्यं दिशन्तीमितरकुचमुखव्यापृतं त्वत्कराब्जं
व्याचुंबन्तीं मनोज्ञम् वदनसरसिजं स्वैरमालोकयन्तीं
प्रेमार्द्रां मातरं स्वां शिव शिव वदने स्मेरतारैरपाङ्गैर्-
मुग्धं प्रोद्वीक्षमाणः पुरुसुकृतनिधिं मोदयामासिथैनां ४८

श्लोकं

बाललोकमवलोकयन्नयं
खेलनाकुलमथात्मसन्निधौ
उद्यतोऽमुमनुयातुमादरा-
दुत्थितो निरपतो बताकुलं ४९

श्लोकं

इहाङ्गसङ्गादपि पादपांसु-
सङ्गो वरीयानिति किं धरायां
पापापहाभ्यां पदपङ्कजाभ्यां
चरन् परिक्रीदितमुद्यतोऽभूः ५०

पदं १० केदारगौडं - चेम्प

पादांबुजेन पशुपालाङ्गनानिवह-
बाहावलंबितकरारविन्दं
सञ्चेरिथेह मृदुसंजातमञ्जुतर-
मञ्जीरनादमथ मन्दमन्दं

पल्लवं

नीलांबरेण सह भवता कृतं
लीलायितं जयति जगदादृतं

मत्सविधमेहि बत वत्सेति बाहुयुग-
मुत्सार्य तातेन जातमोदं
उक्ते तु भित्तिमवलंब्य मृदुहासमद-
सीयाङ्गमाविशो विवशपादं - नीलांबरेण

सञ्चरन्नवलंबविकलमथ सम्मदं
मुरमथन सन्ततं ददपारं
तत्र तत्रापि निजमित्रकैरादधिथ
पावितं पदपरागैरगारं - नीलांबरेण

द्रुतगतौ निपतितं पुनरपि समुत्थितं
निपतितं चामुमवलोकयन्ती
पङ्काङ्गरागरुचिराङ्गं भवन्तमथ
माता समाददे मुदमयन्ती - नीलांबरेण

पशुपाङ्गना सदसि भृशतुङ्गकुचकुंभ-
धृतकम्पमनुसरति पुरुविलासं

व्यावृत्य दैत्यमथनाल्लक्ष्य यत्किमपि
चालप्य यातोसि ललितहासं - नीलांबरेण

हर्षेण विहरणे निकटमनिकर्षेण
गतमजित तर्षेण बत भवन्तं
मुदितमतिराढाय मृदुहसितमंबा चु-
चुंब मुखमीषदुन्मिषितदन्तं - नीलांबरेण

शृङ्गायुधादपि भुजङ्गायुधादपि च
दंष्ट्रायुधादपि च दहनतो वा
त्वां परित्रातुमपि कृत्यानि कर्तुमपि
शक्तेयमजनि न हि विवशभावा - नीलांबरेण

दात्यूहकेकिशुकपारावतान् धाव-
तोऽनुधावन् विहृतिविवशबालैः
लीलैकलोभवानथ भवानतिजवा-
दलमवारि तरसा पशुपजालैः - नीलांबरेण

बाहाग्रसुगृहीतबालाग्रवात्सकस-
माकृष्यमाणमिह सर्वतो वा
त्रैलोक्यनाथमवलोक्यतनुमालोक्य
सकुतुकं त्वां जहसुरुपरि देवा - नीलांबरेण

रामेण साकमभिरामेण रिपुगणवि-
रामेण ययिथ यत्रोरुतोषाः
तत्रैव देव तव गात्रावलोकैक-
चित्ता विचेरुरपि घोषयोषाः - नीलांबरेण

श्लोकं

व्रजपदवनितानां चोरणं चेतनानां
विविधमिति वितन्वन्नच्युताचेतनानां
अपि रचयितुकामो नूनमप्यूनकामो
दधिघृतनवनीतक्षीरचौर्योत्सुकोऽभूः ५१

श्लोकं

मयोपयुक्तं हि यथाकथञ्चि-
न्मुक्तिप्रदं नूनमिति त्वयैवं
समुद्यतं तासु दयार्द्रभावा-
न्मन्येऽन्यथा चोरयसीश किं त्वं ५२

पदं ११ शङ्कराभरणं- चेन्पट

एहि कुमर मुदा कुरु नटनं
नूतनघृतमूल्यकमतिकमनं
इति युवतिगिरा मृदुनिहितपदं
कृतनटनो घृतमपिबोऽतिमुदं
53

पल्लवं

मुरहर किमिह न बत भवता
कृतमधिदधिघृतलोभवता

अवनीमवलंब्य पदाञ्चलतो
भुजमुन्नीयोन्नमिताङ्गलतो
घृतघटमपि नास्पृशदजित भवान्
परिहसितोऽजनि जगदपि मितवान् - मुरहर

द्रुतमुपनेतुमना नवनीतं
भृशमविनीत भवानपनीतं
अभिपत्य घटं निजगात्रलतां
अभिवीक्ष्य गतो मणिभित्तिगतां - मुरहर

उच्चमुलूखलमधिरूढवता
शिक्यं कथमपि च गृहीतवता
भवता गळिताधिकलळितपदा
बत दोलाविहृतिरतानि तथा - मुरहर

निजगृहकृत्ये निरवधियत्ते
पितृसुतभृत्येषु च भृशसक्ते
युवतिजने दधि घृतमपि हृत्वा
पपिथ बिडालगणाय च दत्वा - मुरहर

दध्याधिकघटनिकटोपगतेर्-
निध्याने समुचितहेतुकृते
बद्धादरमुपतदमाहितवान्
अद्धाजित विहरणवस्तु भवान् - मुरहर

श्लोकं

विमोहनानामपि वा विमोहनं
प्रमोदनानामपि वा प्रमोदनं
किशोरलीलायितमीश ते विभो
विशेषरम्यं विवशीकरोति मां ५३

पदं १२ सावेरि - पञ्चारि

नन्दनन्दनेह दुग्धलोभतो भवान्

मन्दमन्दमेव गेहमेकमेयिवान्
मन्थदण्डखण्डितातितुङ्गकुम्भतो
निपतितं पपौ पयो मुखेन मोदतो

पल्लवं

विश्वनाथ तव तु चोरणेषु नैपुणी
विस्मयावहेह लोकहृदयहारिणी

चक्षुषैव वीक्ष्य कापि मन्दिरान्तरे
चोरयन्तमिह भवन्तमवसरान्तरे
चोरयेति किलीताररा गताऽबला
नन्दमिह निशाम्य बत भवन्तमाकुला - विश्वनाथ

किं त्वयाप्यभेदि चौरसर्गवेधस
घट इतीरिते कयापि सरळचेतसा
मर्करचितकर्म किं मयेति कैतवात्
आहितोरुकोपमालपोऽतिवैभवात् - विश्वनाथ

तिष्ठ चोर दृष्टकैतवेति वादिनीं
मृष्टपाणिरित्थमुवचिथाऽथ कामिनीं
दृष्ट एष किन्न कष्टभाषिणीह मे
रुष्टमानसे करोऽधुना त्वयाऽधमे - विश्वनाथ

श्लोकं

अलमलमयि लीलालोल गोपालबालैः
सह विविधविहारैःस्तेयमाहारकालः
प्रणयविवशयेथं प्रार्थितोऽप्यंबयाऽगा
न तु नवनवनीतोद्गन्धवक्त्रारविन्दः ५४

श्लोकं

नवमनवममाज्यं प्राज्यहर्षं जिगीर्षुः
क्वचन वदनवातेनाशु निर्वाप्य दीपं
वलयमणिगणाभाजालभग्नाभिलाषो
निशि निववृतिषे च म्लानवक्त्रांबुजन्मा ५५

श्लोकं

तर्षादवापदिह गव्यगृहं सतोषं
भीत्या ततो निववृते च भवान् सशोकं
एवं मुहुः सुललितानि गतागतानि
तन्वन्नविन्ददजितामितशोकमेव ५६

श्लोकं

एवं देवातिहृद्यैस्त्रिभुवनमहितैरभ्युपायैरनेकैर्-
मुग्धं दुग्धादि मुष्णन्निह सह मनसा पश्यतां शृण्वतां च
धन्यैरन्यूनरागं व्रजयुवतिजनैरादरादीक्ष्यमाणो
बालैरक्षीणपुण्यैरनवरतमरं रम्यथा रम्यमूर्ते ५७

श्लोकं

सदा मुदाऽलोकत केवलं त्वां
जनो मनोज्ञानपि नान्यबालान्
विधुं विधूयाधिकभासमानं
विधौ विलोकेत किमृक्षभेदान् ५८

श्लोकं

हृद्ये पदार्थेऽपि सदावलोकात्
कुतूहलं हीयत एव लोके
विश्वैकरम्यानन पश्यतां त्वां

व्यजृंभतैवान्वहमंबुजाक्षः ५९

श्लोकं

मन्दं विन्यस्य पादांबुजमतिचकितो जातु मञ्जीरनादात्
तत्रत्ये गेहकृत्ये निरत इह जने गूढमन्तः प्रविश्य
शिक्यादुद्धृत्य दुग्द्धं ससखि समपिबस्तावदेवाङ्गनाभिर्-
दृष्टो धावन् गृहीतोऽन्तिकमथ गमितो मातुरुक्ता च सैवं ६०

पदं १३ मलहरि - चेन्प

त्वत्सुतेनामुना यत् स्म नो भिद्यते
तद् व्रजे कुत्रचित् विद्यते नो
दुग्धदधिनवनीततक्रघृतरक्षणम्
नियतमस्माभिरिह शक्यते नो

पल्लवं

गोकुलैकाधिपे सूनुरयि ते
गोकुले सकलमपि रहसि हरते

देवि मे मन्दिरे बालवृन्दैरमा
नन्दनेनागम्य मन्दमन्दं
गोरसं गृहनिहितमापीय पातितं
बत दृषदि पाटितं कुम्भवृन्दं - गोकुलैकाधिपे

देवि मे मन्दिरे दोहनव्यापृतां
लोभनो लोकयन् मा कुमारैः
आविश्य गर्भगृहमनिरीक्ष्य दुग्धमय-
माक्रोश्य शिशुजनमयादुदारैः - गोकुलैकाधिपे

देवि मे मन्दिरे सञ्चरन् मन्थरं
वञ्चको निशि च दधिरसनरागात्
वलयमणिगणरुचा धृततमा दधि पिब-
न्नधिरसं सपदि सरसं स चागात् - गोकुलैकाधिपे

देवि मे मन्दिरे मन्दमेत्याखिले
केळिदोळाकुले गव्यमोहात्
प्राज्यरसमास्वदन्नाज्यरसमार्द्रयन्
मम दृशमनेन गतवान् स गेहात् - गोकुलैकाधिपे

देवि मे मन्दिरे लीलाहवावलो-
काकुलैरविदितो निखिललोकैः
आपतन्नेष पय आपिबन्नोतुमपि
पाययन् निर्ययौ गोपतोकैः - गोकुलैकाधिपे

देवि मे मन्दिरे भीषयित्वा भृशं
क्रन्तयित्वाप्ययं बालजालं
आकुले सकलजन आपतन् कलशघट-
मावहन्नगमदपि हेलयाऽलं- गोकुलैकाधिपे

देवि मे मन्दिरे चाऽमुना मोचितं
वात्सकं वीक्ष्य भृशविवशभावे
निरयति जनेऽन्तरेत्यापश्यता किमपि
घटकुले मेहयित्वा दधावे - गोकुलैकाधिपे

देवि मे मन्दिरे पीठधृतपीठगत
बालगळगो घटमसौ विभिन्दन्
क्षीरधारां करेणापिबन्नितवधू

दृशि पयः ष्ठीव्यन् जगाम नन्दन् - गोकुलैकाधिपे

नन्दपत्नीह ते नन्दनेनाहितं
व्यापृतं बालचापलमितीदं
अक्षमामहि वयं शिक्ष्यतेऽयं न चे
दक्षमा रक्षितुं सममपीदं - गोकुलैकाधिपे

देवि ननु पश्य विश्वैकचोरोयमव
तिष्ठते सुप्रतीक इव लोके
किञ्च यत् किञ्चन च वञ्चितं नो मये
ति स्फुटं नाटयति निजविलोके - गोकुलैकाधिपे

देवि ननु पश्येदमपि वधूभणितिरति
वितथैव ननु जननि नयधुरीणे
विश्वसिहि न च वचनमेतदिदमञ्जसा-
वञ्चसा व्यञ्चयति नयनकोणे - गोकुलैकाधिपे

श्लोकं

श्रुत्वा तासां विलापं भयविवशदृशं म्लाननम्राननाब्जं
दृष्ट्वा चासक्त पाणिद्वयमधिगळमुर्व्यां लिखन्तं पदेन
शोकस्नेहानुकम्पाविवशितहृदया शिक्षणेऽशिक्षणे वा
नेशा सूनुं नृगादीदतिरुषमभिनीयेयमुद्यम्य दण्डं ६१

पदं १४ मुखारि - अटन्त

महितवंशे विहितजाते
रतिरहो ते कथमकार्ये
कथय चौर्ये कलिनिकार्ये
तनय वार्ये परमनार्ये

विदितनीते दुर्विनीते
विगतभीते ललितगीते
विभवजातं नो निकेते
भवति नूनं श्रीसमेते

तव सुबोधे गुणपयोधे
रिंगितं किं न्वन्तरंगे
परमतुङ्गे भरितसङ्गे
कुटिलताया हन्त रङ्गे

तनय चौर्यं विहसनीयं
भुवि विगेयम् भुवनहेयं
परममुष्मान्न तु विधेयम्
भवतु भद्रो ननु विधेऽयं

जननसारान् जनय सूनु
नित्यनाथं भुवननाथं
जननचोरं तनयमापं
विधिबलात् त्वां विहितनाथं

श्लोकं

प्रणयभरपरीतां भारतीं मातुरेता-
मजित मधुरवादी त्वं निशम्येत्यवादीः
वचसि तव वरिष्ठे सर्वदांबावतिष्ठे
शप इह चरणाभ्यां तत् प्रसीदामुकाभ्यां ६२

श्लोकं

श्रुत्वा कर्णरसायनं तव गिरं प्रीत्या यशोदाऽवदद्

गोप्यो नन्दत नन्दनेन न भवेत् कोप्याधिरस्मात् परं
प्रोदीर्येति विमृष्टमिष्टद वितीर्यासौ तव श्रेयसे
दण्डं न्यस्य तवास्यबिंबमधिकप्रेम्णा चुचुंबोत्स्मितं ६३

मङ्गळम्

केळीलोलमुदारनादमुरळीनाळीनिलीनाधरं
धूळीधूमळकान्तकुन्तळभरव्यासङ्गि पिञ्छाञ्चलं
नाळीकायतलोचनं नवघनश्यामं क्वणत्किङ्किणी-
पाळीदन्तुरपिङ्गलांबरधरं गोपालबालं भजे

# Two

## कालियमर्दनम्

श्लोकं

लीलालोले कदाचित् त्वयि फलकुलसंचोरणात्यन्तकुप्यद्
बालोक्तत्वन्मृदाशश्रवणकुपितया प्रोचिषे त्वं जनन्या ।
वत्सेहात्यन्तकुत्स्यं जगति मृदशनं किं कृतं दुर्विनीत-
श्रुत्वा तद्वाचमास्यं विकचकमलदेश्यं त्वयाऽऽशु व्यदारी ॥ १ ॥

श्लोकं

मृदाशसन्देहनिवारणे तदा
निजानने देव मुदा विदारिते ।
महीमहीनां महितान् महीधरान्
समाः स्वमातुस्त्वमदीदृशो दिशाः ॥ २ ॥

श्लोकं

मथ्नत्यां दधि मातरि त्वमपिबो गत्वा स्तनं जातु सा
प्रोद्धर्तुं लघु दुग्धमुत्सृतमगात् क्रुद्धोऽर्धपानात्भृशं ।
भित्त्वा तद्दधिपात्रमात्तनवनीतो यातवा नेतया
त्वं चान्वीय धृतोऽथ बन्धनहरो बद्धो बतोलूखले ॥ ३ ॥

श्लोकं

आकृष्येदमुलूखलं धनदजावापात्य तावर्जुनौ

शापान्मोचितवान् व्यमोचि च भवान् पित्राथ सत्राखिलैः ।
यातो जातुचनोपनन्दवचसा वृन्दावनं पावनं
वत्सानामवनोत्सुकोऽभवदथ त्रैलोक्यरक्षोद्यतः ॥ ४ ॥

पदं १ आहरि - एकतालं

अहनि च कुहचन रचयन्नदनं
प्रग इह हलिना प्रमुदितवदनं
तपनीयकलापैरजित भवान्
कमनीयोऽपि च काचं धृतवान्

पल्लवं

विविधं विदधिथ विहृतानि विधो
विपिने बालकविलसितसविधो

मुरळीं गवलं कलयन् निलया-
न्निजतर्णकसंघयुतो निरयात्
मुरळीरवतरळीकृतहृदयैर्-
मुरहर पृथुकैरपि च स हृदयैः - विविधं

परिभासुरपरभागललामा
भृशपावनशुभभाजननामा
वनमारिथ विषमायुधधामा
विततोरसि सततोदितदामा - विविधं

रचयन् मुरळीं मुखरां मधुरं
रजयन्नपि विपिने मृगनिकरं
रमयन्नुलपैर्वत्सकविसरं
रसयन्नचरोऽर्भकनिवहमरं - विविधं

फलदलविलसिततरुमान्यायां
खरतरदिनकरकरशून्यायां
तव पदनळिनमिळनधन्यायां
व्यहरो नरवरं वरवन्यायां - विविधं

हेलाभरतो मुरहर मुषितं
लीलासाधनमपरैर्विदितं
वेलातीतमुदिदमिह जहतो
बालान् सममिनन्दिथ हसतो - विविधं

क्वचनारचयन्नाहवमनुगैः
रचयन् क्वचनोत्प्ळवनं प्ळवगैः
क्वचन च कृतझंकृतिरळिनिकरैः
प्ळवनकृदिह कुहचन भेकवरैः - विविधं

क्वचनोपविशन् बकवन्निभृतं
क्वचनानुरुवन् बत पतगरुतं
क्वचनारचयन् वृषवन्नदनं
रचयन् क्वचन च शिखिवन्नटनं - विविधं

इति जडजनताचरितेन पथा
विहरन्नरजितारमथारमथाः
अपि कृतरतितात्मनि सह पृथुकै-
रमरैरवलोकित उरुकुतुकैः - विविधं

मुहुरापीय हरे तव रूपं
मुरहर ननु मुनिनिवहदुरापं

विहृतिपरैरिति पृथुकैरमितं
सुकृतिन इह जगति जिता नियतं - विविधं

श्लोकं

तत्समये वत्सवपु-
स्त्वत्सरणीमुत्ससर्प दर्पभरात् ।
त्वत्समरसमुत्सुकमति
रुत्सृतकोपात् सुरारिह कोऽपि ॥ ५ ॥

श्लोकं

दृष्ट्वा दुष्टावमर्दोद्यत दनुजपतिं लीलया पादयुग्मे
धृत्वा तं घूर्णयित्वा द्रुतमुपरि कपित्थस्य चिक्षेपिथ त्वं ।
वत्सान् वत्सैः सहाहन्यथ कुहचिदवन् पाययित्वाथ पाथो
नाथामून् पातुकामान् सखिभिरपि भवान् पीतवान् पीतवासः ॥ ६ ॥

पद्यगीतं शङ्कराभरणम् - एकताळं

बकनामकदनुजो बत सविधं तव गतवान्
बकरूपक उदितामितरभसं कबळितवान्
दहनोपमवपुषं लघु गळतो विगमितवान्
स भवन्तमपि च केशव शसितुं द्रुतमितवान्

अयि माधव वधलोलुपधिषणं सपदि भवान्
अवधार्य तमसुराधिपमधिकं क्रुधमितवान्
अदसीयकसविधं पुनरशनैरुपसृतवान्
अथ तं लघु मुखतो विदलितवान् विशसितवान्

श्लोकं

प्राप्तोभोक्तुमना वनं दिनमुखे वंशीरुतामोदितैः
राजत्तेमनजेमनैः शिशुजनैः साकं भवानेकदा ।
तत्राघं निजघान वाहसतनुं तत्रे च तद्वक्त्रगां
तत्स्थं त्वत्स्थमहो महोऽजनिसुराहर्षादवर्षन् सुमं ॥ ७ ॥

श्लोकं

तिष्ठन् मध्येर्भकाणां कबळफलगणान् पाणिपद्मेऽथ वामे
कक्षे शृङ्गं च वेत्रं जठरवसनयोरन्तरे वंशिकां वा ।
बिभ्रद् विभ्राजमानो विधुरिव भगणैरावृतो हासयन् स्वान्
नर्मोक्त्या भुक्तवांस्त्वं दिवि विबुधगणैर्वीक्षितो विस्मयेन ॥ ८ ॥

श्लोकं

ज्ञातुं तावन्महत्वं तव सपदि तिरोधात् विधाताऽथ वत्सां-
स्त्वय्यन्वेष्टुं गतेऽमून् करधृतकबळार्धे स गोपार्भकान् वा ।
वत्सात्मा वत्सपात्मा गवलमुरळिकावेत्रशिक्यादिकात्मा
प्रापः प्राग्वद्विहृत्य व्रजमथ मुरळीं नादयन् मोदयंस्त्वं ॥ ९ ॥

श्लोकं

तद्वीक्षैकप्रवणहृदयाः सादरं प्राक् सवित्रीः
पुत्रेक्षैकप्रवणहृदयाः साम्प्रतं तां भवन्तीः ।
त्वां चालोक्य प्रतिकलमलं हर्षमुत्कर्षयन्तं
भ्राता सर्वं तदधिगतवानब्दकान्तेऽब्दकान्ते ॥ १० ॥

श्लोकं

वत्सौघं वत्सरान्ते नवमनवमपि व्याकुले लोकयित्वा
लोकेशेऽदीदृशो द्रागरिनळिनगदाशङ्खसंक्रान्तबाहं ।
भ्राजिष्णुं रत्नरोचिष्णुभिरभिनवभूषाभिरिन्द्रोपलाभं

राजत् पीताम्बरालंबितजघनभरं तावदेनं नवीनं ॥ ११ ॥

श्लोकं

तास्त्वन्मूर्तीरसम्ख्याः सुरमुनिदनुजैः शूलिनाप्यात्मना च
प्रत्येकं सेव्यमानाः श्रितजलधिसुता वीक्ष्य धाता मुमोह ।
तावत्त्वां जातमेकं करधृतकबळार्धं स पादारविन्दं
वन्दं वन्दं च मन्दं सविधमुपसरन्नस्तवीदस्तवीर्यः ॥ १२ ॥

पदं २ मुखारि - चेम्प

घनकमनरोचिषे तटिदुपमवाससे
महितवनमालिने पशुपसूनो
कचभरकलापिने मृदुपदविराजिने
मुरहर नमोस्तु ते खलवनकृशानो——

पल्लवं

विबुधवर विषह ननु साहसमहो मे
वितर च विबोधमयि माधव विभो मे

वपुषोपि तेऽस्य न हि महिमानमवसातु-
मीश इह किमु निजसुखानुभूतेः
अवधूय बोधमापीय चरितामृतं
तवरूपमाभजन् केप्युरुविभूतेः - विबुधवर

भक्तिमपहाय योः बोधमभिलषति तुष-
हन्तुरिव हन्त फलमस्य शोको
नित्यमपि निश्चलां तव तु पदपङ्कजे
भक्तिमेवायमभिलषति बुधलोको - विबुधवर

लोकय दुरात्मतां मम परात्मनि भवति
मायिजनमोहने भुवनयोनौ
मायं वितत्य विभुतां बोद्धुमलषमह-
मिह कियान् कील इव स कृपीडयोनौ - विबुधवर

मयि खलु रजोमये मदभरभाजने
मानान्धमानसे दीनबन्धो
भुवनेशमानिनि च भवदीयचरणैक-
शरण इह कुरु कृपां करुणैकसिन्धो - विबुधवर

पृथुकस्य शयितस्य निजमातृकुक्षौ प-
दोत्क्षेप आगसे कल्पते किं?
भवदुरशायिनो मातेव मदपरा-
धं भवान् विषहेत न जगत्पते किं ? - विबुधवर

श्लोकं

तस्मिन्नुक्केति याते त्वदनुमतिमिते सार्धमर्भैः क्षणार्धं
मन्वानैरब्धमेकं कबळमथ भवान् भुक्तवान् भक्तबन्धो ।
सोल्लासैर्वाग्विलासैर्मुहुरपिरसयन्नेष तोषेण घोषं
पश्चात्तैः पश्चिमाशामरुणयति रवावीषदीषां बभूव ॥ १३ ॥

श्लोकं

प्रकाममेतां वसतिं प्रकाशयन्
प्रसारयन् कामद कौ मुदोदयं ।
समेधमानः शनकैः शशी यथा
गवामथातेनिथ चारु चारणं ॥ १४ ॥

श्लोकं

कान्तारान्ते विसृतसुमनः सौरभे सौरभेयीर्-
नायं नायं विपुलमुलपं बाललोकेन साकं ।
गायं गायं सुमधुरमपि द्रावयन् ग्रावजालं
चारं चारं स पुनरपुनाहन्त वृन्दावनं त्वं ॥ १५ ॥

श्लोकं

श्रीदामनाम्नः प्रणयैकदाम्नः
सख्युर्गिरा तालफलं जिघत्सोः ।
त्वं धेनुकारण्यमितोऽग्रजेन
न्यजीघतो धेनुकमुग्रवीर्यं ॥ १६ ॥

श्लोकं

सञ्चार्य गाः सरसमस्तमहास्त भास्वान्
संपाविताकिलदिशोऽस्तमहास्तदानीं ।
घोषं भवानपि च भूरिमहाः सतोषं
योषाजनेन निखिलेन निरीक्ष्यमाणः ॥ १७ ॥

श्लोकं

नाथ त्वं जातु यातः पृथगथ हलिना यामुनं काननान्तं
पाथः स्फायद्विषाक्तं पशुपपशुगणानातपार्त्याशु पीत्वा ।
आलोक्याविष्टमोहान् द्रुतममृतरसस्यन्दसन्दोहनैस्तान्
कारुण्यार्द्रैः कटाक्षैर्जगदवनविधावर्पितात्मन्नताप्सीः ॥ १८ ॥

पद्यगीतं वराटि - चेम्प

अवलोकयतो गरळाकुलितान्
पततो निखिलान् पततोऽनु जले
करुणाकर , हे करुणाजलधे
करुणामसृणा दिषणाऽजनि ते

अहिसारमसारमसारमतीं
तरसा सरसादपसारयितुं
उरुसार रसादथ सानुचरं
मनसा व्यवसायमसावकृथा

पदं ३ वराटि - एकताळं

अंबरचुंबकविटपकदंबं
तटगतममुमधिरुह्य कदंबम्
यमुनांबुनि रयविजितकळंबं
तदनु पपात भवानविळंबं

पल्लवं

रमते नितरां मतिरमरपते
ननु ते दमने खलु खलवितते - रमते

त्रिभुवनभारभृतोऽजित भवतो
निपतनतो निरुपमवेगवतो
धनुषां शतमथ तटमज सहसा
सममज्जयदधिकमुदा सह सा - रमते

उदकादुदगादुरगोऽथ रयात्
सविधं तव हन्तुमभीतिरयात्
अपि मर्मसु दुर्मतिरदशदयं
शिव शिव रभसादपयातदयं - रमते

स तु समवेष्टयदाशु भवन्तं
सकलजनेष्ट सदा शुभवन्तं

स तटस्थोऽपि निशम्य दशां तां
पशुपजनो रुजमभज दशान्तां - रमते

अजित ननु त्वामतिशितदशनै-
रलमदशदसावहिपतिरशनैः
बत मोहरुजापरितापादिक-
मिह पुनरभजत पशुपानधिकं - रमते

वपुरेव तवावृणुतेह परं
विपुलोऽहिवरो न बले हि परं
शैवलजालवृतो जगति गजो
भवति विभो किमु परिकलितरुजो -रमते

पशुपजनोऽथ स रोदोजन्यं
सपदि निशाम्य सरोदोऽजन्यं
सकलोऽपि विभो विवशोऽतिशुचा
व्रजतोऽथ गतो विगतोऽपि रुचा - रमते

अरिदरमुखरेखानिवहपदै-
रयि सुचितया तव विशदपदैः
तरणिसुता च सरण्या तरसा
तरळह्रदमुनाऽपे महितरसा - रमते

वीक्ष्य दशमथ तव रुजमतनुं
याता पातयितुं पयसि तनुं
आरभतावलिरिह गोपाना-
मापतिताधिकधृतिलोपानां - रमते

रुजमजित भवान् निजबन्धुततेर्-

निरसितुमुरुतनुभृदनन्यगतेः
नतजनबन्धो पशुपालमणे
विगळितबन्धो निपपात फणे - रमते

श्लोकं

पीताम्बरेण रुचिरेण विरोचमान-
स्तिष्टन् भुजंगपतिमूर्धनि भेजिषे त्वं
बालांशुमालिकरजालविराजमान
नीलाचलाग्रभवबालतमाललीलां ॥ १९ ॥

पदं ४ काम्बोधरि - पञ्चारि

भोगनाम्नि नटनमकृत-
रंगसीम्नि महितरत्न
दीपधाम्नि विबुधविसरवीक्षकं भवान्

पल्लवं

कृष्ण राम कृष्ण राम कृष्ण राम कृष्ण राम
कृष्ण राम तव तु नटनमधिकमोहनं

पादकमलकलितकनक
पादकटकनिनदवलय
नादकमनपाणिकमलताळमोहनं - कृष्ण राम

चारुनिहतचरणनलिन-
ताळसदृशमखिलविबुध-
जालमधिककुतुकमकृतवाद्यवादनम् - कृष्ण राम

दैवतानि वियति विविध-

यौवतानि विदधुरधिक-
मोदितानि मधुरमधुरगीतकानि ते - कृष्ण राम

देवपरिषदर्जितकुसुम-
माववर्ष पशुपविततिं-
राजहर्ष नुनुवुरपि च तापसर्षभाः - कृष्ण राम

श्रान्तबन्धगळितलळित-
कुन्तळान्तलसितचलित-
पिञ्चकान्तमधिकतरळमकरकुण्डलं - कृष्ण राम

शर्मकारिघृसृणतिलक-
कर्महारिनिटिलनिलय-
घर्मवारिमिळितलुळितनिर्मलाळकं - कृष्ण राम

कंजकदनकम्रवदन-
मंजुविसृतनन्ददमित-
कुन्दसमितमन्दहसितकुन्दसुलळितं - कृष्ण राम

तरळतरळधन्यहार-
मिळनलळितवन्यदाम-
वहनसुबहुमन्यमानबाहुविवरकं - कृष्ण राम

स्थानचलितकमनकनक-
सारसनकनिकररुचिर-
सारकपिशवसनमुदितकिङ्किणीरुतं - कृष्ण राम

उरगशिरसि विलसदरुण-

मणिकविसरविसृतकिरण-
निकरमिळनकमनचरणनळिनयुगळकं - कृष्ण राम

नर्तनेत्रलळितनळिन-
पत्रनेत्रसजलजलद-
मित्रगात्रमयि तवातिमात्रमाबभौ - कृष्ण राम

सन्नतं च सन्नतं च
संत्यजन् फणं भवान्
समुन्नते समुन्नते समुन्ननर्त च - कृष्ण राम

यद्वदेव वसनमजित
पद्वयेन पयसि तमिह
तद्वदेव परिममर्द स च रजो जहौ - कृष्ण राम

अखिलवदनविगळदसृज-
मधिकविवशहृदयमनघ-
मजित तदनु फणिनमतनुविनयमतनुत - कृष्ण राम

अहिरयं तु विदितमन्त-
रथ भवन्तममरवृन्द-
परमवन्द्यमयि मुकुन्द परमवन्दत - कृष्ण राम

श्लोकं

सन्तापशान्त्यै हृदयेषु धन्यैः
संधार्यमाणं विसृतोरुसारं ।
भद्रश्रियं त्वां भुजगेश्वरो य-
दवेष्टयद्देव तदेव युक्तं ॥ २० ॥

श्लोकं

व्रजभुवि वनितानामन्वहं जीवनाशा-
वहमहह भुजंगं त्वां भुजंगाधिपो यत् ।
परमभयविधाने प्रोद्यतं देहभाजां
विशसितुमदशद् द्रागच्युतैतच्च युक्तं ॥ २१ ॥

श्लोकं

धन्या नागेन्द्रकन्या वरमतिविधुरं मूर्ध्नि पार्ष्णिप्रहारैर्-
दृष्ट्वा पुष्टाधयोऽथ त्वरितमुपगता लिप्सवो भर्तृभिक्षां ।
त्वत्पादाब्जे पतित्वा प्रणतिपरजगत्पारिजातायमाने
हस्तावस्तोकभक्त्या शिरसि मुकुळयन्त्योऽमुमस्तोषत त्वां ॥ २२ ॥

पदं ५ सौराष्ट्रं - एकताळं

विरचितशमले समुचितमयि ते
विफलितसलिले शमनं दयिते
एततनुग्रह एव हि जातं
प्राप्तवतोऽस्य भवत्पदजातं

पल्लवं

जीवितनायकजीवितदाना-
दीश दयावश जीवय दीनाः - जीवित

खलजनदमनो निजमवतारं
फलयसि कुशलततेरवतारं
अलभत तव पादरजोऽद्य वरो
यदयम् जननवतामजनि वरो - जीवित

पावनपादरजोऽजित भजते
यो बहुतरसुकृतवशादज ते
वाञ्छति न दिवं स खलु सुजन्मा
माधव तदयं जयति सुकर्मा - जीवित

तव पादरजो जहदाधिनिधौ
गळदवधौ शिव शिव भवजलधौ
मुहुरुन्मज्ञति मज्ञति नूनं
क्वचिदपि तरति न स तु पुनरेनं - जीवित

मायादिव्यनटीनटनमिदं
माधव जनमोहनमिति विशदं
ईक्षत इह साक्षितयैव भवा-
नक्षतमोदं स्वयमक्षयवान् - जीवित

त्रिभुवनमहिततरोरिह मूलं
भवति भवाननुपमसुखमूलं
अतिविततांजित वृतिरपि च भवान्
खरमरुदपि भंगकरोऽस्य भवान् - जीवित

नयनांबुजचुळुकेन तु पिबतां
तव रूपरसायनमिह जगतां
भाग्यलताफलमपचेळिमतां
भजति किं अंहोनदहेळिमतां - जीवित

अलमिह न वने योगिजनोऽयं
किमु तव नवने भोगिजनोऽयं

मुदित स्वयमेव जवादयि तं
मोचय शोच्यमिमं नो दयितं - जीवित

अनुकम्पालय नो विवशाना-
मनुकं पालय शोकवशानां
विलसद्विभुममुमतिविवशेहम्
विलसद्विनयं विमृदितदेहं - जीवित

सकृदपराधं निजजनविहितं
विषहेत महीपतिरपि महितं
पतिजीवितवितरणतो हि हरे
प्रतिजीवये नोऽरुषमपि च हरे - जीवित

नारायण नरकान्तक नारक-
पारायणहरचरणसरोजं
मुरहर मुहुरपि नाथ नमामो
मुरहर मुहुरपि नाथ नमामो - जीवित

दामोदर ते दनुजरिपो जग-
दामोदर ते चरणसरोजं
मुरहर मुहुरपि नाथ नमामो
मुरहर मुहुरपि नाथ नमामो - जीवित

श्लोकं

एवं देव स्तुतोऽहीश्वरममुममुचः सोप्यवादीद् भवन्तम्
जात्यैवात्यन्तकोपाकुलमखिलमहीनां कुलं पङ्कजाक्षः ।
त्याज्यो जातिस्वभावः किमु मुरहर मे निग्रहोऽनुग्रहो वा
स्वामिन् कामं विधेयो भणित इति भवानभ्यभाणित् फणीन्द्रम् ॥ २३ ॥

श्लोकं

भो भो भोगीन्द्र वेगात् प्रविश जलनिधिं नागवैरी न वैरं
मत्पादोत्पन्नचिह्ने त्वयि ननु तनुया देवमादेशतस्ते ।
भक्त्या नत्वाशु भूयोप्युपहृतविविधोपायनानां वधूनां
सार्थैः सार्धं प्रतस्थे प्रतिजलधिमसावग्रणीः पुण्यभाजां ॥ २४ ॥

श्लोकं

ससर्प दर्परहितः स सर्प उदधिं विभो ।
सदर्भकवधूपेतः समर्पितमनास्त्वयि ॥ २५ ॥

श्लोकं

कालिन्दीं विश्वभोग्यां विदधपनयन् काळियं नागमेवं
मित्रैः सम्मोदपात्रैः समगत चभवानस्तशैलेन चार्कैः ।
गन्तुं ध्वान्तोपरोधाधिकमकुशले बन्धुलोके शयाने ।
दावाग्निं पीतवान् द्रागिह तु विसृमरं पातवान् बन्धुतां च ॥ २६ ॥

श्लोकं

काण्डीरैर्जातु भाण्डीरकवटनिकटे गोदमानोऽथ गोपैर्-
द्वन्द्वास्कन्दे प्रलंबं मुरहर हलिना घातयित्वाऽविळंबं ।
ऐषीकाख्यं वनान्तं तृणरसनरसादेयुषीषेव गोषु
द्रागन्विष्यात्र यातो दवदहनभयात् पालयामासिथ स्वान् ॥ २७ ॥

श्लोकं

तव्द्रूपालोकनोद्यत्स्मरविधुरधियो हन्त कान्तं भवन्तं
काङ्क्षन्त्यो गोपकन्या विदधुरथ कळिन्दात्मजातीरदेशे ।
वर्यामार्यासपर्यां विधिवदिह विभो मार्घशीर्षाख्य मासे

तीरे विन्यस्य वासांस्यथ तदवसितौ रेमिरे वारिपूरे ॥ २८॥

श्लोकं

मन्दं मन्दं प्रयातौ निभृतमिह भवान् हेलया चेलजाला-
न्याहृत्यारुह्य नीपं कमपि मुखरयन् वेणुमत्रावतस्थे ।
व्रीळाभीतिप्रमोदैरथ विवशधियो मञ्जुमाणीरवाणीर्-
वाणीं वेणीं सुधायाः सरसमिति हरे त्वां च ताश्चञ्चलाक्ष्यः ॥ २९ ॥

पदं ६ नाथरामाग्रि - पञ्चारि

चेलजालमखिलमेणशाभलोचनाः
हेलयाशु नयत पेलवाङ्गरोचनाः
सत्यमेव गदितमेतदंग नर्म नो
तथ्य एव निरतमाकलयत मन्मनो

पल्लवं

युवतिलोकलोभनाकृते मनोगतं
ननु मनोरथं जवेन पूरयामि तं

अम्बरेण रहितमंबुनीह लेखना-
दंबिकार्चनफलमचलदंबुजाननाः
अंहसो हि विहननाय रंहसैव मा
संहता विनमत सुबहुमानमनवमाः - युवति

बाल चेलमाहरेह मोहनाकृते
लीलयालमखिललोकविरचितानते
नन्दगोपकृतवरेण्यपुण्यपरिणते
नन्दसीदृशीहिते कथन्नु शुभमते - युवति

व्यापृतं तु निन्द्यमेतदेत्य गोकुलं
व्याहृतं तु यदि विहारलोलुपाखिलं
सद्य एव स खलु पशुपलोकरक्षतो
हृद्यरूप दुर्विनीत साधुशिक्षको - युवति

सुचिरमार्य जीव वसनमपहृतं रहो
वितर किमवशीकरोषि किङ्करीरहो
विवशमुदितमेतदेष विदितवान् भवान्
विशदमृदुलहसनवसनमेव दत्तवान् - युवति

युवतिविततिरञ्जितलज्जितापि वेपिता
महितशीतवैभवेन तीरमापिता
चलदुरोजकलशगरिमसन्पदानता
प्रणयमदननुन्नमानसं पदानता - युवति

श्लोकं

सुदुर्लभामत्र हि वल्लवीजने
रतिं परामात्मनि शुद्धतां च तां ।
विदन्नदादेव मुदा तदंशुकं
तदीयकामानपि चान्वमन्यथाः ॥ ३० ॥

श्लोकं

कन्यास्ता धन्यधन्याः सदयमनुगृहीतास्त्वयैवं प्रपन्ना
वीक्षं वीक्षं त्रिलोकीजननयनमनोमोहनांगं भवन्तं ।
गेहं देहेन याता भवति दृडतरं नाथ विन्यस्य चेतो
डिंभैरंभस्ययाऽर्तैस्त्वमथ तरणिजां प्राप्तवान् पार्श्वमाप्तैः ॥ ३१ ॥

श्लोकं

आपीयाम्भः क्षुधान्धैरयि वरद भवान् बन्धुभिर्याचितान्धा
हन्तालं भक्तलोलोऽप्यजनि पुनरपिद्रागलं भक्तलोलः ।
एतानूचे च पोतान् हरिरयमदनार्थीत्यमून् बाडवेन्द्रा-
नीजानन् व्याहरध्वं द्रुतमिति कथितास्तेऽब्रवून्नाप्य विप्रान् ॥ ३२ ॥

श्लोकं

आरादास्ते सरामः प्रसित इह हरिर्भोजने भोजनेता
तीरे सूरात्मजाया मुहुरिति कथितास्तेऽभजन् मौनमुद्रां ।
पोताः प्रोचुश्च तत् त्वामथ समचकथस्तत्प्रिया नाथतेति
प्रोक्तास्तैर्विप्रभार्याः प्रणयपरवशास्त्वं प्रपन्ना धृतान्नाः ॥ ३३ ॥

श्लोकं

धूलीपालीनिलीने रुचिरकचभरे लाञ्छितं पिञ्छजलैः
फाले बालेन्दुलीलां कलयति तिलकेनाङ्कितं कौङ्कुमेन ।
काम्ये साम्येन हीने नयन उरुदयावारिणा पूर्यमाणम्
कान्ते कान्तेर्निधाने वरद परिलसत् कुण्डलम् गण्डदेशे ॥ ३४ ॥

श्लोकं

वत्से वत्सेन रम्ये विलसितवनमालञ्च पीतांबरेण
श्रोणीबिंबे च संवेष्टितमनुगवरस्कन्धसक्तैकबाहम् ।
धन्यात्मन्नन्यबाहाधृतकमलमिमाः काळिकाकेळिकारं
रूपं ते रूपयन्त्यो गतनिखिलपरीतापमापन् प्रमोदम् ॥ ३५ ॥

(युग्मकं)

श्लोकं

सकलमपि विदूय स्वावलोकैकलोभात्
सपदि निजसमीपं संगतानां वधूनाम् ।

समुदितमतिगाढं लोकयन् भक्तिभारं
स मुदितमतिरेवं मम्जुलां गामगादीः ॥ ३६ ॥

पदं ७ सामन्तलहरि - एकतालं

आगमनं पुनरुदितमतीना-
मिदमुचितमतीव हि भवतीनां

पल्लवं

स्वागतमयि वनिता भवतीनां
सादरमिहमयि विहितरतीनां

मयि खलु निखिलजनात्मनि सुकृती
सुमहितभावं वितनोति कृती - स्वागतमयि

अयि तरसैव तरिष्यथ भक्त्या
भवजलधिं कृतविषयविरक्त्या - स्वागतमयि

अधुना सेदत विविधविधानं
विधिना च समापयत वितानम् - स्वागतमयि

श्लोकं

लम्ध्वाप्येवं प्रसादं तव विरहशुचा विप्रभा विप्रभार्या
नत्वा भूयोपि कृत्वा त्वयि खलु विगतं मानसं मानसंगात् ।
पीत्वा रूपामृतं तत् स्नुतरतिभरतो लोचनैर्लोचनैस्त्वा
गत्वा मन्दं प्रपन्ना निजपतिनिकटं विभ्रमा विभ्रमात्ताः ॥ ३७ ॥

श्लोकं

प्राज्यं साज्यं स भोज्यं सरसमुपहृतं विप्रभार्याभिराभिर्-
भुक्त्वा मित्रैर्भवान् गोकुलमगमदलं संकुलं संभ्रमेण ।
को वा तातोद्यमोऽयं व्रज इति निजगादाविजानन्निवामुं
सोप्याचष्टेह वृष्ट्यै शरदि शरदि शक्राद्धरो नो विधेयः ॥ ३८ ॥

श्लोकं

जन्तूनां तापशान्त्यै स खलु शतमखः पुष्टिहेतोश्च वृष्टीं
काले काले कृपालुः सृजतिमुदितधीः सर्वलोकैकपालः ।
वर्षाधीनं नराणां सकलसमुपजीव्यं विशेषादिदं नः
सर्वा गव्याऽपि नव्योलपचयमुपजीव्येयमाव्या पृथिव्याम् ॥ ३९ ॥

श्लोकं

इदं वचो निशमयन् मदं बत शमं नयन् ।
मघोनोऽयमघोनां गामगादीरजिताथ तम् ॥ ४० ॥

पदं ८ भैरवि - त्रिपुट

तात हे शृणु मामकं मतम्दाराददतिसाधु
तोषमेष गतो वृषैव हि वर्षतीति न साधु

पल्लवं

त्वयि मम विभो विदितवेद्यो
भणितिरिति का वा?

कानने खलु पादपावलि-
राददाति सुखेन
पाकशासनमानसे किमु
सम्मदं हि मखेन - त्वयि मम

तन्मतं तव सम्मतं त्वपि
किन्नु वा घटते हि
किञ्चनापि च चिन्तिते सति-
सन्मते तदवेहि - त्वयि मम

स्थितिलयोदयमपि च देहिषु
विहितकर्मभिरेव
नियतमीश्वर इह तदनुसृति-
मात्रतत्पर एव - त्वयि मम

स्वीयकर्मफलान्यथाकर-
णे कृतीन वृषाऽपि
तात कर्मवशं जगन्ननु
वर्तते हि सदापि - त्वयि मम

अप्रमाणमदृष्टमादध-
दत्र कोपि च जातु
न भ्रमेण तदन्यदैवत-
वन्दनं विदधातु - त्वयि मम

वन्दते यदि मन्दधीरयि
विन्दतीह न कोपि
मंगलं परसंगमेन स-
दंगनेव कदापि - त्वयि मम

श्लोकं

सन्देहगदसंघातसंहारकरणौषधम् ।

साधु चेदं वचो मे त्वं सावधानमये शृणु ॥ ४१ ॥

पदं ९ घण्टारमेलं - एकतालम्

अवनिसुरावलिरयि विबुधगणा-
दपि नियतं त्रिजगति महितगुणा
यदयमगस्त्यो रुषमृषिरितवान्
नहुषं सुरपतिमपि पातितवान्

पल्लवं

ननु तात गुरो गुणवारिनिधे
विशदोरुयशोगणवारिनिधे

नृपतिं त्रिशङ्कुमिह कुशिकसुतो
हरिपातितमुदपीपतदपि तं
तदनुग्रहनिग्रहयोरवना-
ववनीसुर एव विभुर्नियतम् - ननु तात

द्विज इह भुवने गुरुरपि च वरो
द्विज इह भुवने सुहृदपि च वरो
द्विज इह भुवने निधिरपि च वरो
द्विज इह भुवने विधिरपि च वरो - ननु तात

दारु मृदु पला अपि विप्रजनैः
कृतसंस्कृतयो बत दैवतताम्
उपयान्ति तदैव च कामदतां
इह को नु वदेद्विजसुमहितताम् - ननु तात

तदपर्याकुलमेषु हि कार्या
परमिह वर्या सपदि सपर्याः
जगतीह तु हेतिभिरभिलसिते
दहने हि जुहोति न खलु भसिते - ननु तात

पशुनिवहावनमिह पशुपानां
कुलधर्मो भवति हि सकलानां
अवनमिदं भवति वनाधीनं
वनमिदमपि भवति धराधीनम् - ननु तात

तदमुं पूजय गोवर्धन कं
प्रतिदिनमुलपैर्गो वर्धनकम्
यवसैरपि मोदय गोपाळिं
विविधैर्विभवैरपि गोपाळिम् - ननु तात

श्लोकं

इति मेऽभिमतं तात मतं मतिमतां वर ।
तरसानुचरेरेतत्तव चानुमतं यदि ॥ ४२ ॥

श्लोकं

आस्वाद्यासौ त्वदास्यामलकमलगलद्वाङ्मधूळीमधूळीं
नन्दो नानन्द्यमानो ननु वचनमिदं वत्स विश्वोपवन्नम् ।
इत्याभाष्यायमाघोष्य च गमनसमुद्योगमुद्वेलमोदैः
सर्वैः सार्धं च गोवर्धनमगमदगं मानयन् साग्रजं त्वाम् ॥ ४३ ॥

श्लोकं

भक्त्या भक्तेन वित्तेन च मुदितमनास्तर्पयन् विप्रवर्यान्
विश्वोत्कृष्टानहार्याय च सपदि सपर्यां स वर्यां वितीर्य ।

गव्यां नव्यांबुतृण्यादिभिरपिमदयन् गोपवामाळकानां
जालैस्त्वद्गानलोलैस्तमगमथ परिक्रम्य यातो निकेतम् ॥ ४४ ॥

श्लोकं

तमपि पशुपमध्ये मोदयन्नास्थितोऽमू-
नपि गिरिवरमूर्धन्यद्गि गोवर्धनोऽहं ।
स्वयमिति मुहुरुच्चैः प्रोच्य विश्वास्य सर्वान्
समुदथ समवापः सद्म सत्रैव पित्रा ॥ ४५ ॥

श्लोकं

श्रुत्वा वार्तामथैतामधिकतररजोघूर्णितात्मा स तूर्णं
जानन्नप्यञ्जसा त्वां शिव शिव शतमन्युः स्वमन्योर्विघातात् ।
तन्वन् निस्सीममन्युं पशुपशिशुरसौ बालिशः सूरिमानी
वाचालो नो विनिन्दत्यहह स महिमा कोपि नष्टोऽमराणाम् ॥ ४६ ॥

श्लोकं

नैतन्मृष्ये हरिष्ये श्रियममुमपनेष्ये मदं द्रागमृष्ये-
त्यासज्य त्वज्जयेऽसौ व्रजभुवि विससर्जाशु पर्जन्यजातं ।
आरूढो दुर्मदान्धः स्वयमपि मघवा सिन्धुरं सम्मदान्धं
निर्यातो वैरिवक्षोभिदुरभिदुरदुष्प्रेक्षदोर्दण्डचण्ढः ॥ ४७ ॥

श्लोकं

सक्रोधं तेन शक्रेण हि सपदि विसृष्टेषु पुष्टाभिमानम्
संघर्षोत्भूतघोषस्तनितमिषमहासिंहनादोद्धुतेषु ।
वर्षत्स्वभ्रेष्वदभ्रं विहितसुमहितस्तंभदंभापसारै-
रासारैरातुरा सा व्रजपदजनता त्वां प्रपन्ना विपन्ना ॥ ४८ ॥

पदं १० मालवगौडं - पञ्चारि

पशुपलोकमधिकशीतजातवेपनं
प्रचुरशोकमजित वीक्ष्य विवशचेतनं
अरुणपाणिसरसिजेन लीलयाऽतुलं
करुणयाऽतिमसृणधीरधारयोऽचलम्

पल्लवं

एकशैलवहनमिह तु किं प्रशस्यते
भूरिशैलगहनभुवनवाहकस्य ते

मातरं च पितरमाकुलं च गोकुलं
कातरं च निखिलगोपगोपिकाकुलम्
सादरं त्वमथ तदीयमापयो विलं
सारसं तु मदकरीव दधदिहाचलम् - एकशैल

पोतमेतमजित साहसैकलालसं
पाहि मे हि विपदि पतितमवशमानसं
स्थेमपद भवत्कृते भवान् सरोदया
प्रेमविवशमति च याचितो यशोदया - एकशैल

प्रेमभारपरवशा हि पशुपबालिकाः
क्षेमलोलहृदयगोपगोपबालकाः
गोधनानि पुरुधनानि चाधिकादरा
विप्रसंसदे दियाऽदुराधिकातरा - एकशैल

शिखरिसत्तमं तु वामबाहुना वहन्
सुरभिमर्शनं त्वमपरबाहुनाऽऽवहन्
सरसतरगिरा च सकलमापयन् मुदं

प्रथमनिहिततोऽचलोऽथ नो पदात् पदं - एकशैल

पशुपयूथममृत रूपमधिहृदादधत्
तव तदमृतरूपममितमोदमादधत्
सुहिततां सुरेश सुमहितामिहावह-
न्न तु तृषाऽपि न क्षुधाऽपि तापमावहत् - एकशैल

निर्विसङ्क्रमचलधारिणः श्रमं तदा
संविशङ्क्य सवसोऽथ तव गलन्मदाः
सर्व एव बाहुमुदनयन्नसम्मदा-
स्तान् विलोक्य किमपि हसितवान् भवान् मुदा - एकशैल

वोढुमपटुरूढकपट इह सहाचलं
गोपवटुरयं पतेत् विकम्पिताचलम्
एवमुदितनिन्दनः पुरन्दरोऽशनैर्-
देव भृशमवर्षयदखिलैरहो घनैः - एकशैल

सप्तवासरमिति सप्तहायनो भवान्
सप्रमोदमवहदचलमप्रमादवान्
शक्रमादमुदितमक्रमेण विहतवान्
अद्रिमाशु महितलेऽत्र देव निहितवान् - एकशैल

श्लोकं

सद्यो मोमुद्यमानैरहमहमिकया त्वं परिष्वज्यमानो
नन्दादैर्नन्द्यमानो गृहमथ पशुपैराप्तवानार्तबन्धो ।
तातोक्तत्वन्महत्त्वद्विगुणितबहुमानानुरागार्द्रगोपं
वंशीनादामृताब्धौ जगदखिलमपि क्षिप्रमाप्लावयस्त्वं ॥ ४९

# Three

## रासक्रीडा

श्लोकं

आताम्राऽतिमनोहराधरपुटे विन्यस्तवंशं मुदा
रन्ध्रव्यापृतकोमलाङ्गुलिदलं साचीकृतास्यांबुजं ।
व्यत्यस्तांघ्रि स विभ्रमोन्नमितवामभ्रूलतं ते स्थितं
चित्ते मे स्फुरतादिदं मुररिपो विश्वैकसम्मोहनम् ॥ १

पदं १ शङ्कराभरणं - चेम्प

मधुरतरमुरलिका निनदमधु रसयतां
प्रमदभरविवशतां ललितगीते
विशदयितुमीश के जगति पुनरीशते
शिव शिव रमापते परसुखमयाकृते

पल्लवं
मुररिपो तव विभो मुरलिकानिपुणतां
भणति यदि फणिवरो गिरि भजति मसृणतां

निखिलजगदुपगीतनिरतिशयनिजगीत
निरवधिकमदममरयोषाकुलं
गलितं कराञ्चलादपि विपञ्चीं तदा

किञ्चिदपि नाविदन्महिततोषाकुलं - मुररिपो

दृप्ततरमत्तगजमस्तकविमर्दने
बद्धमतिरिद्धरुषमुद्धतपदा
कुंभिनीं पीडयन्नंगमुत्तंभय-
न्नचरमं कृतक इव हरिरभादपि तदा - मुररिपो

किमपि मीलीतनयनमस्पन्दनिखिलांग-
मननुभूतानन्दभरसंकुलं
उलपाग्रनिहितास्यमुन्नमितकर्णयुग-
मखिलमपिलिखितमिव संस्थितं गोकुलं - मुररिपो

अधिजानुनिहितनिजमुखपाणि नयनयुग
परिहीणचलनमतिमोदाविलं
कीशकुलमीशपुनराशु वनशाखिशिख-
रेषु निषसाद भृशवीतनिजचापलं - मुररिपो

किसलयविहीनोऽपिविदलोऽपि विफलोऽपि
विसुमोऽपि विपिनभुवि विटपिनिकरो
बाल्य इव पल्लवैरपि दलैरपि फलै-
रपि मणीचकचयैरभवदतिसुखकरो - मुररिपो

बहुना किमिह वेणुकूजने मोहने
झृंभमाणे जगति निखिलभुवनैः
क्रियमानकर्मविरतैरहो स्थाणूवद-
वस्थितं भूरितरमोदभवनैः - मुररिपो

श्लोकं

गोपिका हि तव वंशिकाविरुतसेवनाकुलितमानसा
गेहतो बहलवेगते गहनमागता महितलालसाः ।
सान्द्रकान्तिभरचन्द्रकान्ततर चन्द्रिकावति निशामुखे
बालवातधृतसालजातसुमवासिताखिलदिशामुखे ॥ २

श्लोकं

नन्दनं हृदयनन्दनं प्रणयमन्दिरं जनितकौतुकं
स्वापयन्त्यजित पाययन्त्यपि पयोधरं मधुरगीतकं ।
तावकीनवरवंशिकाविरुतनूतनामृतनिषेवया
गोपिका विद्रुतबालका विपिनमाप कापि विवशाशया ॥ ३

श्लोकं

आचरन्त्यधिगतादरं चरणमर्दनं प्रणयसंयुता
मातरं त्वरितमातुरामपि परा विधूय विपिनं गता ।
व्याधितं क्षुदतिबाधितं सुमहिताधिकं बत पराधिकं
मानयन्त्यजित भोजयन्त्यपि च संत्यजन्तयि गताऽभिकं ॥ ४

श्लोकं

देवदेव ननु देवनेन निशि खेलने वरतनू रता
कामुकेन वरधामकेन सह तं विहाय विपिनं गता ।
निर्भरं हि परिरभ्य निद्रितमपास्य कापि निजकामुकं
निर्भयैव निशि निर्जगाम लघु निर्जरेन्द्र पुरुकौतुकम् ॥ ५

श्लोकं

आकुला मनसिजाशुगावलिभिराशु कापि पशुपांगना
यातुमीश विहिताशया बत निजानुकेन कृतबन्धना ।
बन्धमोचनसमीहनीदमुपलभ्य यद्वदिह योगिनी
हन्त सा खलु भवन्तमाप लघु भान्तमन्तरवियोगिनी ॥ ६

श्लोकं

श्रोणिभार उरुतारहारमुरसीश सारसनपालिकां
धारयन्त्यधिकधामिका सपदि धाविता पशुपबालिका ।
अञ्जसैकदृशमञ्जनेन सुखमञ्जती सुतनुरेकिका
सञ्जगाम वनमञ्जनाभ लघु कञ्जनाभ सशलाकिका ॥ ७

श्लोकं

केशवेश घनपेशले रुचिनिवेशने रुचिरगात्रिकां
केशवेश इह कामवेशविवशा निबध्य मणिपात्रिकां ।
मालती कुसुममालिकामपि पयोधरेऽधिकमनोहरे
बालिकाऽशु पशुपालिका सरसमाप कापि विपिनं हरे ॥ ८

श्लोकं

मामयं मनसिजामयं मनसि जाज्वलं मधुहरोऽधुना
सोढुमक्षमतयोडरागमिह गूडमाह्वयति वेणुना ।
देवदेव वनमेतदेव ययुरेवमेव विहिताशया
व्याकुला निखिलगोपिका नविदितामिथोहि भवताशया ॥ ९

श्लोकं

रम्ये धम्मिल्लबन्धे लसितमतिलसच्चन्द्रकैः पिञ्छजालैः
कान्ते दन्तच्छदान्ते मुखरमुरलिकं वक्षसि स्फारहारं ।
निस्सीमाभं नितंबे विशदतरपिशंगांबरेणांबुजाक्ष्यो
व्यत्यस्तं पादयोस्त्वामतिकुतुकमलोकन्त लोकाभिरामं ॥ १०

श्लोकं

बन्धून् संभावयन्त्यो गुरुजनमपि शुश्रूषया तोषयन्त्यः
सूनून् संलालयन्त्यो वयमपि रमयन्त्योवरानार्तबन्धो ।
सर्वाश्चाकृष्य नीता वनमयि मुरलीनादमन्त्रेण वेगात्
तस्मादस्मन्न् भजस्वेत्यवशमवनतामुत्पदे त्वत्पदे ताः ॥ ११

श्लोकं

पादाग्रभागपतिताः पशुपालबालाः
सौभाग्यगर्विकधियोऽथ विभो विभाव्य ।
मन्दस्मितातिविलसद्वदनारविन्दो
मन्दं स्म ता वदसि वाममवामचेताः ॥ १२

पदं २ केदारप्पन्तु - चेम्प

स्रिकृष्ण

स्वागतमुदयतु सुकृतवतीनां
साम्प्रतमयि भवतीनां
यानत इह लघु खेदवतीनां
शीलितमृदुलगतीनां

पल्लवं

लोकविलोचनलोभनहेलाः
हे गोपालमहेलाः

आननलंघितपङ्कजजाता
यूयं जगति सुजाता
मत्कृतसुकृतवशादभिजाता
दृक्पथयाता जाता - लोकविलोचन

अलमलसमपासितधृतिसारं
कटितटकुचकचभारं
किमिति व्यथितं चरणमुदारं
नवकिसलयसुकुमारं - लोकविलोचन

इह मम भजनकृते यदि यानं
तदुचितमुपचितमानं
तदपि गृहानितदूरे नूनं
फलतेभजनमनूनं - लोकविलोचन

स्वयमापतिता सुमहितकामा
कथमिवहेया वामा
तदपि सथीनां मम ननु वामा
मतिरिह संगे वामा - लोकविलोचन

पतिपदपरिचरणमशेषाणां
परिजहदिह योषाणां
निपततिबत निवहोऽविषहाणां

निकरे खलु निरयाणां - लोकविलोचन

असदृशमदृशं पतिमुरुकोपं
व्यसनिनमितधनलोपं
असुभगमपि जठरं जळरूपं
न सति त्यजति विरूपं - लोकविलोचन

रतिरिह परपुरुषे वनितनां
पदमयि परमसुखानां
सुरुचिरमावासममुं त्वरितं
तदयतमान्यं दयितं - लोकविलोचन

समधिकमधुरा व्यसनमयन्तं
सदयं वो मृगयन्तं
स्वजनं मदयत भियमपि यन्तं
सपदि गता निलयन्तं - लोकविलोचन

श्लोकं

मोहाविष्टा महेळाततिरिति गिरमाकर्ण्य वक्त्रोद्गतां ते
हा हा कष्टं कराळा खलु गरळझरी निस्सृताऽद्यामृतांशोः
किं कुर्मः किं वदामः शिव शिव शरणं कं प्रयामो व्रजामः
कुत्रायं रागभारो हृदय इह परं नो जरिष्यत्यवश्यं ॥ १३

श्लोकं

एवं सा चिन्तयन्ती मुरमथन मुहुर्निःश्वसन्ती च दीर्घं
गंभीरेऽम्भोदनादे प्रसरति भुजगीवाकुला दीनदीना
मुञ्चन्ती बाष्पधारां मुखमवनमयन्ती लिखन्ती पदा गां

वक्तव्यान्यत्र युक्तान्यनवगतवती दुःस्थितात्मैव तस्थौ (युग्मक) ॥ १४

श्लोकं

रोषव्रीळाविषादैरपि विवशधियश्चञ्चलाक्ष्यः कथञ्चित्
किञ्चित् संश्रित्य धैर्यं नयनसरसिजे बाष्परुद्धावलोके
बाहाग्रेणावमृज्य प्रणयपरवशा भंगुरैस्त्वामपांगैः
सभ्रूभंगं सरागं स्फुरदधरपुटं वीक्षमाणा जगुस्ताः ॥ १५

पदं ३ इन्दिश - चेन्प

भुवनकमनाकृते तावके पादपा-
थोजके पातुका महितकामाः
गदितुमिति किमुचितं नो निखिलमपि विधू-
यागता हन्त मा संत्यजे मा

पल्लवं

जय जय रमारमण कृपणबन्धो
जय जय सतां शरण करुणैकसिन्धो

अपि कुहचिदिह जगति विजहाति किमु वारि-
वाहो हि चातकीरधिकदीना
अपि च विसृजेदमृतकिरणो हि कैरवा-
णामिह किमावलीरात्मलीना - जय जय

आतपादतिपिपासातुरा तटगता
मृगवधूततिरहो भूरितापा

भुवनाधिहारेण कासारकेण यदि
वार्यते का गतिः पूरितापा - जय जय

भद्र शतपत्रसमवक्त्र ननु भक्तजन-
मत्र सतु पद्मनाभो यथा वा
भज तथा पुनरिमाः वयमिमामयि सखे
बत सहेमहि रुजामिह कथं वा - जय जय

तदभिनवतारुण्य तव महितकारुण्य-
पदपावितारण्यभुवि निषण्णाः
त्वां भजामो विविधगुणवरेण्यं विनत-
जनशरण्यं विषमशरविषण्णाः - जय जय

भवदपाहृतहृदां किमपि नो विचलतो
न तु पतौ कथमिमौ महितबाहो
मुरलिवरगानजामयि मदनदाहिका-
मधरसुधयाऽऽशु निर्वापयाहो - जय जय

सुमुख यदि विमुखोऽसि जन एष दग्धतनु-
रेत्य च त्वां भवेत् सफलकामो
भवविरोधी भवान् किञ्चायमपि पञ्च-
सायको जायेत विफलकामो - जय जय

श्लोकं

सुदतीनामुदितमिदं
रुदतीनामथ निशम्य रम्यतनो
करुणाकर सपदि भवान्

करुणाकुलधीरभूद्भिभो नितरां ॥ १६

श्लोकं

आभीरिणामाशा-
माभीक्ष्ण्यादर्थितामभिप्रातुं
आभीरसेनविरहा-
दाभीरुभिरचलदचलहृदय भवान् ॥ १७

श्लोकं

मन्दरणन्मञ्जीरो
मन्दस्मितसुन्दराननेन्दुरगात्
नन्दज चलवनमालो
नन्दन् मुदिताभिराभिरथ यमुनाम् ॥ १८

श्लोकं

गोपीभिरुत्तरीयै-
राकल्पितसंस्तरोनिषण्ण इह
आत्मारामोऽपिभवा-
नारब्धाऽऽभिः समं तदा रन्तुम् ॥ १९

श्लोकं

लळितैः केळीलपितैर्-
लसितैर्हसितैश्च चुंबनैः कमनैः
कृतमोहैरुपगूहै-

रपि तासु तदोदजृंभयो मदनम् ॥ २०

श्लोकं

अतिकमनादुरुजघना-
न्नीवीं नावैन्नितान्तविश्ळथिताम्
कुचयुगळादपि गळितां
ललितां वनिताजनोऽपि कञ्चुलिकाम् ॥ २१

श्लोकं

भवदर्पितदन्तव्रण-
मण्डनलाभेन कापि गोपवधूः
इतरं मण्डनवृन्दं
निनिन्द नितरामनिन्दनीयमपि ॥ २२

श्लोकं

कलशपयोधेरुदितं
त्रिदशगणायादिशोऽमृतमकामः
अधुना पुनरधरामृत-
मापीयासां स्वयं न तृप्तोभूः ॥ २३

श्लोकं

प्रमदापादितमुदय-
द्रागभराधिकरुचिरमाश्ळेषं
प्राप्य च यथेप्सितममुना

मुमुदे जगदेकनाथ हे भवता ॥ २४

श्लोकं

सुतनूनां या संख्या
स्वतनुमपि तावतीं भवान् कृतवान्
मञ्जुळकुञ्जगृहादिषु
मन्दमुपानीय ता बतारमयत् ॥ २५

श्लोकं

मयि मयि मायाविकलं
विलीयतेऽमेयरागभरतोऽयं
इति मदभरमपनेतुं
द्रुतमथ तासां तिरोदधाथ विभो ॥ २६

श्लोकं

अद्वैतानन्दसिन्धाविति सपदि निपात्यांगनाः स्वावलंबाः
कान्तारेऽन्तर्हिते त्वय्यथ मदरहितां गूढमादाय राधां
भग्नाशास्ताः शुचा त्वां निगमहृदि निगूढं वने मार्गयन्त्यो
वार्तामार्तैकबन्धो तव च तरुलताः प्रश्नयन्त्यो विचेरुः ॥ २७

पदं ४ नाथनामाग्रि - एकताळं

त्वमशोक निशामय शोकवशा
ननु शोकविनाशन नो विवशाः
कपिशदुकुलं कमनीयांसं

किमलोकय इह कमपि पुमांसम्

पल्लवम्

यदि स तु दृष्टो वद बत वार्ता
द्रुतमयि जीवय नो भृशमार्ता - यदि स तु

तावकनवकिसलयमृदुलाभ्यां
चारुतरामलपदकमलाभ्यां
विचरणपर इह निरुपमहेळं
विपिने विवशितनिखिलमहेळम् - यदि स तु

परिमळपरमनिकेतन गहने
ननु केतक कोपि युवा गहने
भवताऽलोकि किमतिकमनीयो
बहुसुकृतवशादिह महनीयो - यदि स तु

तावकमञ्जुळनवमञ्जरिका-
मञ्जुतराभोगविभञ्जनिका
प्रसृतातिरुचीभररमणीया
प्रसृतायुगळी ह ह ह यदीया - यदि स तु

राध :

कृतमाल सखे मदनसमानं
द्युतिजालनिधे निरवधिमानं
कमपि युवानं कळमृदुगानं
किमु लोकितवानसिलसमानं - यदि स तु

महति यदीये जघनेऽतिघने
मनसिजभवने भुवने कमने
परिहितमंबरमति कमनीयं
भवदीयमणीचकरमणीयम् - यदि स तु

चलदलविलसित कोपि च पाको
ननु चलदल सुचरितपरिपाको
निखिलदृशां निरवधिसुकृतवता
किमलोकि वने विजने भवता - यदि स तु

भवदीयामलदलतुलनीयं
जगतीहाधिकतरकमनीयं
युवतीजनमानसमदनीयं
जगतीपदमुदरं हि यदीयम् - यदि स तु

सुपलाशपलाशक चपलाशं
विसृतयशोविशदितनिखिलाशं
कमपि भवान् मुखविजितकलेशं
पुरुषं किमलोकत सकलेशम् - यदि स तु

ललनामानसविचलनमूले
ललिते हि यदीये भुजमूले
नवनखरेखा विलसति समिता
तव मुकुळवरै रुचितति समिता - यदि स तु

कुरबकलतिके कुसुमविलसिते
परिमळभरिते किमु दृशमयि ते

इह कोपि युवा शिशिरीकृतवान्
जनममुमधुना विधुरीकृतवान् - यदि स तु

तव कोरकनिकरैरधिकमहो
तुलनामयते जननयनमहो
जगतीह यदीयो रदनिवहो
रुचिरतरामलरुचिनिकरवहो - यदि स तु

सखि कमलिनि कमलविकासवती
ननु लोकविलोभिविलासवती
पुरुतरसुषमं त्वमदृष्टवती
परमं पुरुषं किमु दृष्टवती - यदि स तु

तव नवदळदळिता भुवि सरा
दृगिह यदीया विजितविसारा
परिद्रुतयुवतीततिधृतिसारा
महितरुचीभरमथितमसारा - यदि स तु

कुवलयवन ननु कुशलं भवते
कुवलयवर इह कोपि युवा ते
सविधं किमितो मदयन् हृदयं
सजलपयोधरपरमसुहृदयम् - यदि स तु

तावकसुषमामनुहरमाणो
भावकजनचेतसि रममाणो
जगति यदीयो घनचिकुरभरो
लसति महीयोघनरुचिरतरो - यदि स तु

श्लोकं

एवं पृच्छन्त्य एता विविधतरुलताः सञ्चरन्त्यो वनान्ते
दृष्ट्वा पुष्टाधिभारं गदितनिजदशां तां पुरोधाय राधां
सर्वाः सप्ताश्वपुत्रीपुलिनमुपगता रंहसा संहतास्ता-
स्त्वच्चेष्टास्त्वन्मनस्काः सिततरसिकताविष्टरेषूपविष्टाः ॥ २८

श्लोकं

पादौ तौ ललितौ सरोजलसितौ जंघे च ते बन्धुरे
जंघाले खलु केकिकण्ठविजये ते जानुनी चारुणी
ऊरू तौ महितौ च तत् कटितटं व्यालंबिपीतांबरं
वत्सं तद्वनमालभारि विपुलौ भोगोपमौ तौ भुजौ ॥ २९

श्लोकं

वक्त्रं नेत्रमहोस्त्सवो ननु च तत् सम्मोहनं तत् स्मितं
तद्बन्धूकनिभं तु दन्तवसनं कान्ता हि दन्ताश्च ते
गण्डौ तौ मणिकुण्डलाञ्चितरुचौ नासा च सा भासुरा
नारीणां स्मरणेऽपि धैर्यहरणे ते दीक्षिते चेक्षणे ॥ ३०

श्लोकं

चिल्लीनां जगतां विलोकितवतां चिल्लीमतल्ली च सा
फालं तत्तिलकोपशोभि नितरां ते कुन्तळा मञ्जुळाः
लोकक्षोभकरीह सा च कबरी पिञ्छावलीलाञ्चिता
सा कान्तः स जलांबुवाहसुषमासंहारिणी हारिणी ॥ ३१

श्लोकं

वाणी मानसहारिणी नवसुधावेणी च सा शृण्वतां
सा भंगी गमने निकामकमने रम्या च सा नर्मगीः
गूढापांगनिरीक्षितं शिव शिव त्रैलोक्यविक्षोभि तन्-
मारोन्मादविधायि वेणुरणने तत् कौशलं पेशलम् ॥ ३२

श्लोकं

लावण्यं तदवर्णनीयमपि तद्दाक्षीण्यमव्याहतं
नैपुण्यं तदशेषकर्मसु च तत्कारुण्यमव्याजकं
तारुण्यं भुवनैकहारि किमपि प्रोद्भिन्नमंगेषु तत्
प्रावीण्यं जनरञ्जने तदिहतच्चौचित्यमत्यत्भुतम् ॥ ३३

श्लोकं

स स्त्रीणां हृदयंगमा सुभगता सौजन्यमुद्रा च सा
सा वा हन्त सुशीलता मधुरता भावज्ञता प्राज्ञता
स्मारं स्मारमहो मुहुर्मुहुरिति त्वय्येव तासां तदा
लीनं नूनमभूदलं ननु हरे चेतो हि चेतोहरे ॥ ३४

श्लोकं

इति भवति सकामं लीनचित्ता निकामं
विदधुरपि विलापं ता हरे भूरितापं
तव सपदि वियोगादाकुला वीतभोगा
मुरमथन महेळा व्याधुताशेषहेळाः ॥ ३५

पद्यगीतं कानक्कुरुञ्जि - पञ्चारि

गोपिकागीतं

क्वनु भवानिमा दासिका रयाद्
व्यसनसागरे पातयन्नयाद्
सकृदपीश ते दर्शयाननं
नळिनलोभनं लोकमोहनम् ॥ १

कुचकुशेशये कर्कशे भृशं
पदपयोरुहं नाथ तेऽनिशं
मृदु निधीयते तेन कानने
चरसि हा कथं कण्डकायने ॥ २

अधरशीथुना तेऽधुनाऽतुलं
विजहि नो विभो मन्मथानलं
श्रवणमेकयापीश नो गिरा
शिशिरयाचिरात्त्वं सुधाकिरा ॥ ३

अधिकमाधुरीलोभनोदिते
सकलकामिनीमोहनाकृते
कुटिलमानसेन त्वयाऽदयं
सरळमानसा वञ्चिता वयं ॥ ४

विलुठतीरिमा भूतलेऽवशं
धृढशुचा विमूढाशया भृशं
सुखय धैर्यचौर्यैकदीक्षितै-
रुरुदयोक्षितैर्नो निरीक्षितैः ॥ ५

श्वसितमारुतापातवेपिते
नयनवारिहारैकभूषिते
मनसिजानलेनातितापिते
कुरु पयोधरे पाणिमीश ते ॥ ६

हृदयदारणं तापजृंभणं
विदय किञ्चन त्वं च दारुणं
कलय चापले नाथ कारणं
विनयवारणं धैर्यचोरणम् ॥ ७

तव तु नो दया मानिनीकुले
भवतु जातुचिन्मेदिनीतले
यदिहपूतना भूरिसौहृदा
बत हताऽपि ते स्तन्यदा मुदा ॥ ८

चिकुरजालकं मंजुपिञ्छकं
रुचिरफालकं मंजुळाळकं
धृतिविमोचनं चारुलोचनं
कमलभञ्जनं लोकरञ्जनम् ॥ ९

मकरकुण्डलं गण्डमण्डनं
वदनमण्डलं तापखण्डनं
अधरमाधुरीं बन्धुरामलं
विजितकंबु ते कन्धरातलम् ॥ १०

पृथु निरन्तरं ते भुजान्तरं
भुजभुजंगमं कान्तिदन्तुरं

जघनमण्डलं काममन्दिरं
कपिशवाससा चातिसुन्दरम् ॥ ११

करभचारु ते चोरुगौरवं
चरणतल्लजं धूतपल्लवं
अजित बन्धुरां गानमाधुरीं
विजितसिन्धुरां यानचातुरीम् ॥ १२

सकलमेव संचिन्त्य सन्ततं
हृदिह नोऽतिसन्तापसन्ततं
भजति चन्द्रकान्तोदयन्महो
मिळितचन्द्रकान्तोपमामहो ॥ १३

अकरुणावशेऽपीदृशे जने
तव पदांबुजैकावलंबने
कपटनाटके पाटवं हरे
प्रथयसे कथं मन्मथतुरे ॥ १४

जय जयोरुकारुण्यवारिधे
जय जयोरुलावण्यवारिधे
जय जयोरुविज्ञानवरिधे
जय जयोरुसम्मोहवारिधे ॥ १५

भवति चेद्दया तेऽतिपीडिते
भवति नोऽपि चेद्भक्तिरीडिते
वपुरिदं मनोमोहनं मना-
गधिकशोभनं दर्शयाधुना ॥ १६

इति विलप्य ता दीनमानसा
भवदवेक्षणे भूरिलालसाः
पुरुदयानिधे माधवाबला
रुरुदुरुच्चकैरच्युताकुलाः ॥ १७

श्लोकं

गोपीनां विविधं विलापमधिकं रम्यं निशम्यार्द्रधीर्-
लोकानन्दनसुन्दरांगलतिको मन्दस्मितार्द्राननः
कान्तारान्तरतो मुरान्तक भवनाविर्बभूवाग्रतो
जीमूतोदरतो यथामृतकरो व्याजृंभयन् मन्मथम् ॥ ३६

श्लोकं

पुरः प्रादुर्भूतं प्रचुरकरुणासार्द्रनयनं
प्रसन्नास्यांभोजं प्रसवशरमोहावहतनुं
प्रहृष्टा दृष्ट्वा त्वां युगपदजितोत्तस्थुरबलाः
प्रपन्ना जीवं स्वं द्रुतमिह मृता माधव यथा ॥ ३७

श्लोकं

प्रसर्पन्निःश्वासाभिधनवनभस्वत्प्रियसखे
प्रदीप्ते विश्वात्मन् विरहदहने तापगहने
कृतापाता गोपीरनघ लघुगोपायितुमनाः
कटाक्षैराकृष्य प्रमदजलदौ प्राक्षिप इमाः ॥ ३८

श्लोकं

तदा काचिद्बाला प्रणयभरनुन्ना द्रुतमिता
प्रसन्नाऽसन्नं ते किशलयमनोज्ञं करतलं
गृहीत्वाऽघ्राय स्वे कुचकलशमध्ये निदधती
विराजद्रोमाञ्चं विरहजरुजं हन्त विजहौ ॥ ३९

श्लोकं

विधूयेमां हा मां वनभुवि विधुतार्यचरितं
वधूमन्यां धन्यां सरसमुपभोक्तुं बत गतं
स्पृशेत् का वा धूर्तं शठतरमते त्वामिति रुषा
हरे पश्यन्त्यन्या परुषमतिदूरे स्थितवती ॥ ४०

श्लोकं

सुधारूपं रूपं त्रिजगदभिरूपं तव मुदा
दृशाऽपीयापीय प्रणयविवशा कापि वनिता
निधायान्तः स्वैरं पुनरिदमनुध्याय निभृतं
स्फुरद्ब्रह्मानन्दा बत मुकुळिताक्षी स्थितवती ॥ ४१

श्लोकं

भुजाकाण्डं कान्तं तव भुजगभोगातिसुभगं
परा काचित्कण्ठे प्रणयतरळा वेष्टितवती
निरुन्धानेवासून् कथमपि यियासूनतिरयात्
स्वकीयान् नाळीकाशुगविशिखपातेन विवशा ॥ ४२

श्लोकं

मनो मे त्वं मुष्णन् क्व नु कितव कृष्णान्तरदधा
क्वचिच्चोरो दृष्टो यदि सपदि दण्ड्यो हि नियतं

उदीर्यैवं दाम प्रणयतरळादाय कुरळा-
दराळापंगी काप्यकृत कृतबन्धौ तव भुजौ ॥ ४३

श्लोकं

अहो मां रागान्धां वनभुवि विधूयाशु गतवान्
भवान् व्याजेन त्वां कितव कथयित्वा तु विपिने
विधूयाहं यामि व्यसनमिह जानातु विरहे
निगद्येत्यन्याऽन्तर्हिततनुलताऽस्थात्तरुतटे ॥ ४४

श्लोकं

वचः श्रुत्वा तत्तादृशविशदरागातिविवशं
वधूनां साधूनां प्रणयकलहात्यन्तसुभगं
स्वनाथानामासामथ सपदि कोपं व्यपनयन्
गिरं प्रेमावेशादभिदधिथ नाथातिमधुराम् ॥ ४५

पदं ५ सौराष्ट्रं - चेन्प

आभीरिका नियतमापूरये निखिल-
माशासितं मनसि यदिह लोके
आशु भृशमहितमिह रोषमयि हृदि जहित
तोषमपि भजत गतसकलशोके

पल्लवं

कुसुमशरशरनिकरजनितभंगं
शिशिरयत मृदुहसितसुधया मदंगम्

अनुवृत्तये तु मयि चेतसो नियतमिद-
माहितं मुनिभिरपि दुरवलोके
अतिकरुणहृदयमिममतिकठिनहृदय इति
बत किमपि कलयत न युवतिलोके - कुसुम

आलोभनीयसुषमालोकनीयवपु-
रालोकनादिहाशु भवतीनां
आकुलं भवति बत मानसं नियतमयि
मामकं महिततरशुभवतीनाम् - कुसुम

अपि यामिनीश करभृशराजिनीषुमद-
भरदायिनीषु रजनीषु नूनं
अधिकरसमनिशमपि परिरमत विविधमपि
विपुलतरपुळिनभुवि विरहहीनम् - कुसुम

श्लोकं

निशम्येदं रम्यं निरवधिकरागं निगदितं
निरातङ्कैरेतैर्निरतिशयसम्मोदविवशैः
वधूलोकैःसाकं सरससरसां रासविहृतिं
विधातुं प्रारब्धाः प्रहितमति रासां सुचरितैः ॥ ४६

दण्डकं १

पादं १

नद्धा कलापततिरद्धा सखीभिरथ
बद्धादरं चिकुरजाले
नवरुचिजटाले ननु विमलफाले

नमदमरवरनिकर रुचिरतरमपि तिलक-
मरचि तव भसनकुललसदळकमाले

पादं २

तारं मनोज्ञरुचिधारं भवानुरसि
हारं दधौ भुवनसारं
तरळरुचिभारं ततजघनभारं
तरुणतरतरणिकरमदविसरहरणपर-
कपिशतरवसनवरलसितमकृतारम्

पादं ३

बाहायुगे विहितमाहावने रचित-
हहारवे रिपुततीनां
बहुमणिनिलीनां बहळरुगहीनां
वलयततिमधित वरकटकमपि चरणभुवि
जयति वपुरिदमजित गतिरिह यतीनाम्

पादं ४

नाणीयसीं तदनु वेणीं बबन्धुरल-
मेणीदृशो विशदचेला
नतसुरमहेळा नयनहरहेळा
नरकहर वलयवरनिकरमपि कटकमपि
पदकटकमपि च दधुरतिमधुरशीलाः

दण्डकं २

पादं १

योषाकुले विपुलतोषाकुले विमल
भूषाकुले वलयचारे
युवधृतिविदारे युवतिमदहारे
युगळमपि युगळमुभयत उदितरुचिरुचिररुच
उपरचितसुबहुवपुरिह खलु विहारे

पादं २

रासाभिधामधिकमासादितामलवि-
लासामिमां विहृतिकान्ते
रतिरमणकान्ते रतिरचितकान्ते
रभसगतकलहरतमुनिरमितमुदवदत
पुनरजित भृशमहितसुरपटलिकान्ते

पादं ३

रागादमर्त्यततिरागात् प्रियाभिरनु-
रागाकुलाभिरनुयाता
रयभरपरीता रसवशहरीता
रजनिकरनिभवदन तव महिततरचरित-
नुतिनिरतभृशमुदित मुनिततिपरीता

पादं ४

जल्पैरिहेश किमनल्पैः सुरैरधिक-

दर्पैर्वियद् वृतमशेषैर्-
जनितपुरुतोषैर्जवरचितघोषैर्-
जननहर तव विहृतिमहितमहममितरस-
भरितमनुभवितुममुमतिकुतुकपोषैः

पदं ६ घण्टारं - पञ्चारि

पाणिकमलताळमिळितपादपातने
पादकटकहेमवलयनादमोहने

पल्लवं

गोपलोकपुण्यपरिणतेऽतिमोहने
वासुदेव लेसिथेह रासखेलने

कमनकनकसारसनकनिनदलोभने
तरळतरळतारहारनिकरशोभने - गोपलोक

सरसमंसलंबिमृदुलकम्रकरतले
चलितकुण्डलाभिरामगण्डमण्डले - गोपलोक

वदनलसितघर्मसलिलबिन्दुजालके
रुचिरचिकुरभारगळितकुसुममालिके - गोपलोक

मधुरमधुरगळितवेणुनादबन्धुरे
विविद्धविबुधवाद्यतालमेळसुन्दरे - गोपलोक

श्लोकं

तदनु मृदुलहासी वेणुनादापहासी
मधुरतरमगासीरूढरागैर्विलासी
पशुपयुवतिजातैरीश साकं सुजातैः
पुरुसुकृतसमेतैर्भूरिसम्मोदमेतैः ॥४७

पदं ७ केदारगौडं - एकताळं

श्रुतियुगसुखदो मृदुपिकनिनदो
बत जयति हृदो मम विहितमदो

पल्लवं

ननु कमनीजनकमनीयानन
कमलालोभनकमनविलोचन

विधुनोति च नो विधुकिरणगणो
धृतिभरमखिलं कृतहिमकिरणो - ननु

विदधति हृदये परिमळलळिताः
विकृतिं लतिका मम सुमलसिताः - ननु

वितनोति रतिं मरुदतिशिशिरो
हृदि नो मृदुरतिसौरभरुचिरो - ननु

मधुकरविरुतं मम मधुरतरं

विदधाति मनो ननु विधुरमरम् - ननु

रसभरलसितं सारसरसितं
रसयति बत नो मतिमयि नियतं - ननु

मदयति हृदयं शिव शिव मदनो
मम नियतमयं त्रिभुवनमदनो - ननु

सुखयति सुतरां यमुनापुळिनं
मदनं यमिनामपि नो नयनं - ननु

श्लोकं

**निशाम्य सुदृशामीश**
**विहृताविति चातुरीः**
**विस्मयदुत्स्मयोऽगादी-**
**स्त्वां च तश्चञ्चलाशयाः ॥ ४८**

पद्यगीथं

भैरवि, भूपळि, इन्दिश, कानक्कुरिञ्ञि, सौराष्ट्रं, इन्दळं - पञ्चारि

**वामलोचना लोकलोभने**
**नैपुणीह वो रासखेलने**
**संतनोति मे हन्त सान्प्रतं**
**स्वान्तमेतदानन्दसम्भृतम् १**

देव देवकीपुण्यसंहते
देव देवतासंसदां पते
नाथ केवलानन्दसन्तते
जायते किमानन्दनं तु ते २—

कुङ्कुमद्रवोऽयं कुचान्तरे
भूषणान्ततरं मे भुजान्तरे
जायतामलं मीनकेतुना
व्याकुलात्मनो मीनलोचनाः ३

इन्दिराविलासैकमन्दिरे
निन्दितारेरे लोकसुन्दरे
वत्सदन्तुरे ते भुजान्तरे
मण्डनान्तरेणेह किं हरे ? ४

गोपबालिका लोकलोभना-
दाननेन्दुतो मोददोहनात्
मन्मथव्यथादायकादलं
मन्मनोऽमृतं पातुमाकुलम् ५

नाथ पादपाथोजसेविने
भाग्यभाजनायेह देहिने
साधु तेऽमृतं संहृतव्यथं
दातुरीश गोरीदृशी कथम् ? ६

नृत्यतोऽपि मे धृत्यपोहने
नर्तनान्तरे चित्तमोहने
साम्प्रतं रतिं याति चेतना
मारमार्गणैरूढवेदना ७

यो रतिं सदाप्यात्मनीयसे
किं त्वमन्यतो रन्तुमीहसे ?
किं गिरेदृशा नोऽखिलात्मना
किङ्करीरिमा योजयात्मना ८

सारसारसाकारलोचना
हारिहारिणापांगलोकनाः
तारतारका वो भवेत् प्रियाः
साधु साऽधुना संगतिर्मया ९

कामकाममोहावहाकृते
कामकामदानोदितादृते
देवदेवतापादितस्तुते
देवदेव शौरे नमोस्तु ते

श्लोकं

कान्ता सीमन्तिनीसंसत्
क्लान्ताऽसीदथ खेलनात्
कामरूप हरे कामं
कामबाणवशंवदम् ॥ ४९

पदं ८ कामोदरि - अटताळं

तदा काचित् पयोजाक्षी क्ळमादत्यन्ततान्ताक्षी
निलीनांसे तवोदारे सलीलं हरे

पल्लवं

वधूवृन्दं न किं तेने तटे यामुने
प्रमोदाख्ये तदाऽपारे परीपातादकूपारे

परा कापीह तन्वंगी त्वदीयास्यं तु खिन्नांगी
सरोमाञ्चं चुचुंबेदं सदामोददम् - वधू

वधूरकन्या कपोलान्ते हरे धन्या कपोलान्ते
निधायारां सुधासारं पपावधरम् - वधू

महेळाऽन्या महीयोऽलं महाभागाऽप तांबूलं
त्वदास्यांभोरुहे लीनं हृदामोदनम् - वधू

गळन्मालामिळद्बाला विदुर्नीवीं नता बाला
गळन्तीं कुन्तळीपाळीं न वा कञ्चुळीं - वधू

अलं वाचा वहन्मोदं कदंबं ज्योतिषाञ्चेदं
विळंबालंबितं शौरे चिरादंबरे - वधू

प्रकामोद्यद्भवत्सेवैः प्रजाधीशादिकैर्देवै-
रशेषै रासनिष्णातं विशेषादृतम् - वधू

सुजातं गोपिकाजातं मनोराज्यं मनोजातं
त्वदीयादङ्गसैवायात् प्रसादोदयात् - वधू

तदा नन्दार्भकात्मानं सदानन्दार्पकात्मानं

परं ब्रह्मैव साकारं भवन्तं परं - वधू

प्रपद्येमामहाभागा भवत्येवोदयद्रागा
जनिं धन्यामिमां शौरे निजां मेनिरे - वधू

श्लोकम्

महेळानामाळी महिततमहेळा मधुरिपो
महेळामाधुर्या विहरणमहे लालसवती
अरं स क्लान्तापि प्रसृमररिरंसान्धहृदया
परं सामोदं त्वां पृथगथ गिरं साधु निजगौ ॥ ५०

पदं ९ कांबोधि - एकताळं

विसृजन्नतनुरशङ्कं कृष्ण
विशिखं विहितातङ्कम्
विदलति बत मामेतां कृष्ण
विदयमपि त्वदुपेताम्

अयि मां पायय साध्वीं कृष्ण
तव मधुराधरमाध्वीं
सुमनोहर येनाहं कृष्ण
लघु विजहाम्ययि दाहम्

त्वामविलोकयमानां कृष्ण
त्वामपि लोकयमानां
पञ्चशरोऽयमये मां कृष्ण
सन्तपतीश् बते माम्

अच्युत भवदवलोके कृष्ण
तृप्यति का वा लोके
रात्रिरुपैति विरामं कृष्ण
तत् परिपूरय कामम्

अयि विरचय परिरंभं कृष्ण
सफलय मम कुचकुंभं
अधरं तेऽमृतजुषं कृष्ण
कुरु रदखण्डनभूषम्

विलसितहृदयविकारं कृष्ण
विरहितविविधविचारं
विलुळितपृथुकचभारं कृष्ण
विगळितकुसुममुदारम्

मदचलमदनागारं कृष्ण
मसृणितनियताचारं
मुखरितरशनावारं कृष्ण
मुकुळितनयनमसारं

जृंभितमन्मथवीरं कृष्ण
संभृतरागमधीरं
भुग्नपयोधरभारं कृष्ण
भग्नमनोहरहारम्

व्यञ्जितरसगंभीरं कृष्ण
शिञ्जितमणिमञ्जीरं

मृदुहसितसुधासारं कृष्ण
मृदुलवचोमधुधारम्

श्रमजलसुभगशरीरं कृष्ण
श्रमहरपुळिनसमीरं
अलसतरामलतारं कृष्ण
विलसितमणितमतारं

प्रकटितगूढाकारं कृष्ण
प्रकृतजनीफलकारं
पुरुपुळकालङ्कारं कृष्ण
परमानन्दाकारम्

फलितमनोरथपूरं कृष्ण
भणितमनोधिकदूरं
प्रियसख ननु सुखसारं कृष्ण
प्रसरतु विहरणसारम्

श्लोकं

प्रत्यक्षरस्रुतसुधालहरीममुं गां
प्रेमानुरागकरुणामसृणैरपांगैः
अंगीचकार च भवान् पशुपांगनाना-
मासामनंगशरभंगुरमानसानाम् ॥ ५१

श्लोकं

देवततिरावृतमथाळिभिरमेयं

देवतरुसूनमबलाळिभिरमेयं
व्याततमुदाजित विकीर्य नतकायं
व्यातनुत नुतिमिततापसनिकायम् ॥ ५२

पदं १० धनाशि - एकताळं

नतवल्लवजनपदतल्लजजित-
नवपल्लवकुल मुरहर जयजय

पल्लवं

नर-नारायण नरकनिवारण
नरकविदारण मुरहर जय जय

नयनप्रमददकमठप्रवरक-
कमनप्रपदक, मुरहर जय जय - नर-नारायण

शिखिकण्ठावलिभृशशङ्कावह-
मृदुजंघायुग, मुरहर जय जय - नर-नारायण

इभकरलोभनरुचिभरमोहन-
महिततरोरुक, मुरहर जय जय - नर-नारायण

जघनस्थलधृतकनकप्रभनव-
वसनप्रवरक, मुरहर जय जय - नर-नारायण

तारमनोहरहारविराजित-

चारुभुजान्तर, मुरहर जय जय - नर-नारायण

मृदुसंक्वणदुरुकङ्कणकांगद-
वरसंगतभुज, मुरहर जय जय - नर-नारायण

स्मरदरमदहरवरतररुचिभर-
विलसितगळदल मुरहर जय जय - नर-नारायण

शरदुदितामलशिशिरकरोपम-
वदनसरोरुह, मुरहर जय जय - नर-नारायण

तरळीकृततरुणीजनमुरळी-
वरलळिताधर, मुरहर जय जय - नर-नारायण

चञ्चलकाञ्चनकुण्डलमण्डित-
मञ्जुळगण्डक, मुरहर जय जय - नर-नारायण

सुमनोरमतिलसुमसुमनोहर-
सुमहितनासिक, मुरहर जय जय - नर-नारायण

यौवतमानस मानविमोचन
लोभन लोचन, मुरहर जय जय - नर-नारायण

रुचिविजिताळिकरुचिरतराळक-
लळिततराळिक, मुरहर जय जय - नर-नारायण

चन्द्रकलाञ्चितपिञ्चकुलाञ्चित-

मञ्जुळकुन्तळ , मुरहर जय जय - नर-नारायण

सजलपयोधरनिकरमनोहर-
सकलकळेबर, मुरहर जय जय - नर-नारायण

श्लोकं

देवैरेवमभिष्टुतोऽथ शनकैः क्रीडां समाप्यादरा-
दासामाकुलचेतसां स्मरशरैरापूरयो वाञ्चितं
काळिन्दीसलिलेऽथ देव विहरन् कान्ताभिराभिः समं
कान्तारे च मनोहरे पुनरगा मोदाकुलो गोकुलं ॥ ५३

श्लोकं

सान्द्रानन्दचिदात्मनि त्वयि विभो सक्षात् परब्रह्मणि
स्वान्तं कान्तधिया निवेश्य रममाणनां रमावल्लभ
गोपीनामगणेयपुण्यविभवानां वर्ण्यते केन वा
तत्तादृग् बत भागधेयमहिमा भक्तैकबन्धो हरे ॥ ५४

श्लोकं

गौर्यां वर्यां सपर्यां क्वचिदहनि सरस्वत्युपान्ते वनान्ते
दीव्यन्त्या देव गोपा विधिवदथ विधायास्वपन्नत्र रात्रौ
तन्मध्ये नन्दगोपं बत कबळितवान् दन्दशूकोऽथ कोपि
द्रागस्मात् भक्तबन्धो त्वमपि पदहतात् पालयामासिथैनम् ॥ ५५

श्लोकं

ततिमथ वनितानां कामबाणान्धितानां
विहरणनिरतानां कामपालान्वितानां
क्वचन निशि विशङ्कं शंखचूडोऽथ निन्ये
त्वमपि महितमन्युस्तं जवादन्वधावीः ॥ ५६
56

श्लोकं

प्रमदानिकरं च मदं च निजं
प्रविहाय गतं धनदानुचरं
प्रददाथ विभो प्रततातिरुषा
प्रददाथ च मौलिमणिं हलिने ॥ ५७

मंगळं

देवैरेवमभिष्टुतोऽथ शनकैः क्रीडां समाप्यादरा-
दासामाकुलचेतसां स्मरशरैरापूरयो वाञ्छितं
कालिन्दीसलिलेऽथ देव विहरन् कान्ताभिराभिः समं
कान्तारे च मनोहरे पुनरगा मोदाकुलो गोकुलं ॥

# Four

## कंसवधः

श्लोकं

आयातं जातु भद्रात्मकमपि तममभद्रात्मकं द्रागरिष्टं
गोष्ठे निष्पीडयामासिथ वसनमिवाक्रम्य पादेन सार्द्रं ।
प्रापद् भावत्कभावैकवि दुरुमियमृत्पातजातावलोकाद्
भोजेन्द्रं नारदोऽसावथ मुनिरमुनाप्याच्यताभ्यर्चितोऽभूत् ॥ १

श्लोकं

अथ मुनिपुंगवभोजनृपा-
वहितवधावगमैकरतौ ।
अतिमधुरां गिरमेवमुभा-
वकथयतां च मिथोऽजित तौ ॥ २

श्लोकं

भूमिपालकुलमौलिजालमणिराजमानपदपीठ ते
वासरोपगतधूसरोडुपतितुल्यमास्यमवनीपते ।
तावकीन्हृदि तायमानमयि तापभारमधुनाऽतुलं
व्यक्तमेव बत वक्ति तेन मम वर्तते हृदयमाकुलम् ॥ ३

श्लोकं

न्यक्षतो नृवर रक्षतो भुवनमक्षतोरुबलबाहुना
लक्षये नियतमक्षयेह न तु दुःखमूलमिह तेऽधुना ।

लोभनीयगुण गोपनीय मयि नो यदीह मयि सादरं
साधु तद्विभज तावकीनहितसाधनाहितमतावरं ॥ ४

श्लोकं

विश्वलोकभृशविश्रुताधिकसुदुश्चरामलतपस्यया
दीप्तरूप ननु वेत्सि लोकगतवृत्तमेतदतिशस्यया ।
चित्तरूपमुकुरोत्तमे त्विह महत्तमे स्फुरति किन्न ते
कीर्तयाशु यदि कीर्तनीयमजचेष्टितं नियमिनां पते ॥ ५

श्लोकं

शौरिणा नृवर वैरिणा तव निकारिणा कुसृतिकारिणा
तानि तानि विहितानि किन्न विदितानि वैरिगणदारिणा ।
माधवे निखिलदानवेशभृशतानवेऽनिशकृताग्रहे
जात एव विनिमाय तेन धृतनन्दजोऽयमवसद् गृहे ॥ ६

श्लोकं

कामपालमपि नाकपालमुखलोकपालहितलोलुभो
भूमिपाल लघु धेनुपालनिलये कृताऽथ निभृतं विभो ।
एधमानतनुशोभमाननवयौवनौ भुवनलोभनौ
तावुभावपि च तावकानुचरतापिनौ व्रजनिवासिनौ ॥ ७

श्लोकं

दानवेषु महिताहवेषु भृशवैभवेषु भवता द्रुतं
यापितेषु लघु तेषु तेषु बत केन वा पुनरिहागतं ।
सावधानमिह ते वधाय बत तौ मनो वितनुतो रणे
तद्विधेहि लघु तद्वधाय परमुद्यमं यदुशिखामणे ॥ ८

श्लोकं

श्रुत्वा वार्तां त्वदीयां तदनु मुररिपो जन्मकर्मादिरूपां
तत्तादृक्क्रोधभारस्फुरदधरपुटं मण्डलाग्रं कराग्रे ।
धृत्वा कंसं जिघांसुं पितरमजित ते स्वासनादुत्थितं तं
दृष्ट्वा भीतो मुनीद्रो मधुरमभिदधे तं प्रशंसन् नृशंसम् ॥ ९

पदागीतं पन्तुवराळि - एकताळं

नारद

नरदेव वृथा वसुदेवमहो
जहि मा जहि मा महिमावसथ
लघिमापि भवेल्लघु माननिधे
तदतो विरतो भज तोषमरं १

इति तं नृपतिं तव तातवधाद्
विनिवार्य गतेऽथ मुनौ मुदिते
कुपितेन च तेन नृपेण विभो
तव तौ पितरौ कलितौ रचितौ २

श्लोकं

कंसो मांसाददेश्यस्तव तदनु वधे केशिनं हस्तिपालं
मल्लांश्चादिश्य कल्यान् भवदुपनयने प्राहिणोद् गान्दिनेयं ।
धन्यानामग्रगण्यो निखिलभुवनरूढः शतांगाधिरूढो
हन्तायन्नन्तरेऽयं त्वयि विनिहतधीरन्तरेवं व्यचिन्तीत् ॥ १०

पदं १ केदारगौडम् - चेम्प

सुचरितं विचरितं प्रागमेयं
यदजितं त्वरितमवलोकयेयं

पल्लवं

मम खलु मनो महितमयति मोदं
मदभरितभोजनृपरचितखेदम्

हन्ताद्य मम विहतमशुभजातं
नन्तास्मि हरिपदं यदभिजातं - मम खलु

विश्वमपि शकुनमिह कुशलरूपं
वीक्षेय विधुमुखं तदभिरूपम् - मम खलु

फलवदपि जनुरजनि ननु मदीयं
पश्येयमपघनं यददसीयम् - मम खलु

अरिपक्षगोऽयमिति किमुत निन्देत्
अतिभक्तिभागिति स किमुत नन्देत् - मम खलु

श्लोकं

एवं चिन्तां वितन्वन् विविधमयमयन् गान्दिनेयो दिनान्ते
संप्राप्तो गोकुलं तत् तदनु तत इतः सङ्कुलं गोकुलेन ।
भद्रां श्रीपादमुद्रां यवकुलिशसरोजाङ्कुशाद्यङ्कितां ते
किं किं नालोक्य चक्रे शिव शिव नितरां भक्तिभाराकुलात्मा ॥ ११

श्लोकं

माहादोहनलोकनाकुलतरस्वान्तौ चरन्तौ मुदा
सायाह्नाहितमज्जनामलतरस्वान्तौ भवन्तौ तथा ।
संवीतासितपीतरूपवसनौ त्रैलोक्यसम्मोहनौ

व्यालोकिष्ट स हृष्टधीः कतिपयैराभूषितौ भूषणैः ॥ १२

श्लोकं

भवता भवतापहृता भजतामसतामपि तापमिहावहता
अवलोकयता हलिना सह तं मुमुदे जगदेकपते नितराम् ॥ १३

श्लोकं

भक्त्या दूरान्नमन्तं प्रणयविवशमुत्थाप्य चालिंग्य दोर्भ्यां
केशिव्योमाभिदानासुरहननविधाश्लाघिताभ्यामुभाभ्यां ।
प्रोद्यत्प्राज्यप्रकर्षं परपुरुष दुरापोरुभाग्यप्रकर्षं
सभ्रातभ्यर्हयामासिथ नतशिरसं गान्दिनीनन्दनम् तं ॥ १४

श्लोकं

करकमलेन तदीयकरं
परिकलयन् हलिनापि समं ।
निरतिशयं निलयं निभृतं
तमसि निनेथ दिनेऽथ गते ॥ १५

श्लोकं

प्रशान्तेनाशेषामपि कथयता कंसभणितिं
निशां तेनानैषीरथ सपदि नन्दादिपशुपैः ।
निशान्तात् त्वां यान्तं पशुपसुदृशो वीक्ष्य विवशा
निशान्ते सन्तपादिति बत विलापं विदधिरे ॥ १६

पदागीतं कांबोधि - पञ्चारि

ननु विधे दया नैव जायते

कुहचनापि हा लोकनाथ ते
यदिह मोहयन् देहिनोऽखिलान्
महितरागभाराधिकाकुलान् १

अतिमुदा मिथो नाथ योजय-
न्नतिशुचा ततोऽमून् वियोजयन्
विविधभोगलोलान् गुणांबुधे
विहरसे विनोदाय किं विधे २

भुवनलोभनं माधवाननं
परमशोभनं शोभलोपनं
प्रमददोहनं लोकमोहनं
रुचिरलोचनं मानमोचनं ३

महितनासिकानाळदन्तुरं
मकरकुण्डलेनातिभासुरं
अधरबिंबकान्त्यादिबन्धुरं
मधुरमन्दहसातिसुन्दरं ४

किमपि हन्त नो दर्शयन्निदं
लघु तिरोदधाथातितापदं
कठिनचेतसो व्यापृतं तु ते
बत विनिन्द्यमेवेह चिन्तिते ५

अजित ते कथं नाथ दासिकाः
सह सदा त्वयैवाहितासिकाः
त्यजसि माधवामूरुपासिका
बत पदांबुजैकावतंसिकाः ६

मृदु पुराऽस ते नाथमालसं
शिव शिवाधुना जातमायसं
किमिह देहिनां दैववैभवं
वितनुते हि नो भूरिगौरवं ७

अपृथगास्थिता कुत्र ते गता
निजजने दया लोकविश्रुता
इह कृपालुतापादितां प्रथा-
मयि सखे हरे मा कृथा वृथा ८

स्वपितरौ पतीनात्मजान् गृहा-
नपि विहाय ते संगमाग्रहाः
सततमास्महे तन्न वेत्सि किं
सकलसाक्षिता ते क्षताऽज किं? ९

मधुकिरो गिरो मन्थरं गतं
मधुरमीक्षितं मोहनं स्मितं
मनसि ते खिलं माधव स्मृते
मदनपावके मारुतायते १०

अगतयो वयं माधवाधुना
त्यजसि चेदिमा नो दयं विना
जगति चातकीनां घनादृते
व्रजति को नु जीवातुतां पते ११

प्रतिदिनं दिनेशो वियोगिनीं
सुखयते न किं वा सरोजिनिं
पुरपुरन्ध्रिकापुण्यपूरते

स्मृतिपदं भवेमेह किं पते? १२

अपहरन् स नो जीवितं परम्
व्रजभुवो द्रुतं क्रूरधीर्वरं
बत भवन्तमक्रूरनामतां
कथमयेदयं धूमकेतुतां १३

स सुकृतीपुरे कामिनीजनो
जनिफलं भजेदद्य किन्नु नो
कळभयानवल्लोभनं गतं
तव तु रूपयन् रूपमद्भुतं १४

असुकृतीह चेद् गण्यते वयं
ननु कनिष्ठकाधिष्ठिताः स्वयं
किमिह कुर्महे शोकसञ्चिताः
किमिह चक्ष्महे दैववञ्चिताः १५

श्लोकं

इति बत विलपन्त्यो गोपिका निःश्वसन्त्यो
रुरुदुरिह वहन्त्यो हन्त तापं दुरन्तं ।
प्रणयममितमन्तर्वीक्षितैः सूचयन्त्यो
विवशमति भवन्तं सस्पृहं लोकयन्त्यः ॥ १७

श्लोकं

शरण्य जगतां पेतुस्तरुण्यो विरहानले ।
हिरण्यरेतसि यथा हरिण्योऽरण्यसंभवे ॥ १८

श्लोकं

अक्रूरेणाधिरूढो रथमथ हलिना वा सहायं सखायं
गोपीनामातुराणां कमपि खलु विमुच्याधिभारं विमोच्य ।
वेगादागाः प्रतीरं दिनकरदुहितुस्तज्जले त्वां विमज्जन्
वीक्ष्योन्मज्जैक्षत त्वामतिकुतुकमपिस्यन्दने गान्दिनेयः ॥ १९

श्लोकं

निर्मज्ज्याऽलोक्य भूयो भुजगवरशयं भूषणैर्भूषितांगं
निस्सीमोद्यत्प्रभोत्सारितसमसमयोत्सर्पिभास्वत्सहस्रं ।
राजन्तं वैजयन्त्याप्यरिकमलगदाकम्बुकम्राग्रहस्तं
लक्ष्म्या भुम्या च संसेवितमिति नुतवान् पूरुषं त्वां पुराणम् ॥ २०

पदं २ पाटि - चेन्प

मुरनरकमथन जय पुरमथनदयित जय
सुरपरिषदधिप जय जय जय मुरारे

आनन्दरूप जय गोविन्द राम जय
गोवृन्दपाल जय जय जय मुरारे

आनीलबाल जय गोपालबाल जय
लोकैकपाल जय जय जय मुरारे

मरणभयहरणकर कृपणजनभरणपर
चरणगतशरणवर जय जय मुरारे

सुरविसरसुखनयन सरसिरुहसमनयन
पुरुसुकृतकृतनवन जय जय मुरारे

शान्ताशयावनत संतापनापहर
कान्तामलांगलत जय जय मुरारे

श्लोकं

लक्ष्मीकान्त विभो भवापह भवानक्षीणकान्ते हरे
वक्षोभागविभासिहार भगवन्नक्षामरक्षामते ।
जिष्णो विद्विषतां स्थितौ त्रिजगतां धृष्णो भविष्णोऽवने
विष्णो वृष्णिकुलावतंस शमलं मुष्णातु पुष्णातु च ॥ २१

पदं ३ मलहरि - एकताळं

सारविसारवराकृतिंमितवान्
आशु हयग्रीवं विशसितवान्
यो निगमगणान् विधयेऽर्पितवान्
माधव तस्मै नाथ नमस्ते

पल्लवं

पुरुषोत्तम परपुरुष नमस्ते
विभुधोत्तम मुरमथन नमस्ते

कामठमपि पृथुलवपुर्धृतवान्
कामद ननु मन्दरमुद्धृतवान्
योऽमृतममरानपि पायितवान्
माधव तस्मै नाथ नमस्ते - पुरुषोत्तम

क्रोडवराकृतिमलमनुकृतवान्
घोरहिरण्याक्षहतीं कृतवान्
क्षोणिमिमां यो बत रक्षितवान्
माधव तस्मै नाथ नमस्ते - पुरुषोत्तम

नरकेसरितनुमुररीकृतवान्
सहिरण्यं खलु कशिपुं हतवान्
प्रह्लादं यो बत पालितवान्
माधव तस्मै नाथ नमस्ते - पुरुषोत्तम

मोहनमपि वामनवपुरितवान्
दानवकुलनाशन बलिमृतवान्
यो जगदिदमखिलं बतमितवान्
माधव तस्मै नाथ नमस्ते - पुरुषोत्तम

भृगुकुलममलं तदलंकृतवान्
कृतवीर्यसुतं समरे जितवान्
नृपकुलमपि कुपितो यो हृतवान्
माधव तस्मै नाथ नमस्ते - पुरुषोत्तम

दिननाथकुलं हि सनाथितवान्
पितृवाचा वनभुवि विचरितवान्
रावणगळमपि यो विदलितवान्
माधव तस्मै नाथ नमस्ते - पुरुषोत्तम

हलवरधर ननु राम नमस्ते
क्षितिभरहर ननु कृष्ण नमस्ते

नर नारायण नाथ नमस्ते
सुखबोधसदेकमय नमस्ते - पुरुषोत्तम

श्लोकं

मज्जन्नप्याशु मज्जन्निह सुकृतवतामग्रगण्यो वरेण्ये
ब्रह्मानन्दांबुराशावतिविवशमतिर्भक्तिभारेण नुत्वा ।
तत्रैवान्तर्हिते त्वय्यथ सकुतुकमुन्मज्ज्य फुल्लाननाब्जं
कंसारामं स निन्ये सपदि परिणते त्वां दिने गान्दिनेयः ॥ २२

श्लोकं

भ्राता सत्रात्र भुक्त्वा सखिभिरपि भवान् नूनमाकृष्यमाणः
पौराणां पुण्यपूरैरखिलजनवृतां राजवीथीमथागात् ।
अत्रायान्तं च कश्चिद्रजकमदलयत् प्रार्थनापार्थ्यरोषात्
प्राणैषीत्तोषभारं वरवितरणतो वायकं मालिकं वा ॥ २३

श्लोकं

कुब्जामृज्वीं वितन्वन् सरसतरगिरा संगमं चानुगृह्णं-
श्चापं भित्त्वाथ भित्तेन च सपदि भवानक्षिणोद्रक्षिणो वा ।
सानन्दं नन्दवाटीं सह सखिभिरितो यामिनीं यापयित्वा
रंगद्वारं बृहद्वारणगहनतरं प्रापिथाथ प्रभाते ॥ २४

श्लोकं

स कराळतरं करवाळवरं
स्वकरेण वहन् समरोहदरं ।
अज रम्यतरं निज हर्म्यतलं
यदुराडपि मन्त्रिजनेन समं ॥ २५

श्लोकं

प्रकोप्याभ्याशापातितमिभकुलापीडममुकं
प्रहारैस्ते घोरैरजित विततापीडममदं ।
विलुञ्चन् दन्तौ त्वं कृतरिपुकुलापीडनविधो
नदन्तं सांबष्ठं लघु कुवलयापीडमवधीः ॥ २६

[ अथवा सन्प्रहारवर्णने सतिं

*नाम्ना कुवलयापीडं धाम्ना निरुपमाजितः ।*
*कोपयन् दन्तिनं यन्ता प्रापयन्निकटं तव ॥ (१)*

*रभसाकुलितं रभसापतितं*
*तरसा भरितं तरसाऽवितथं ।*
*अवपात्य जवादवनीकदनौ*
*प्रहरन्नकरोऽपि हरे रदनौ ॥ (२)*

*अतिघोररदाहतिवीतमदं*
*द्विषदन्तक हन्त नदन्तममुं ।*
*असतामवधीरणधीरवधी-*
*रपि यन्तृवरानपि मन्तुकरान् ॥ (३)* ]

श्लोकं

दन्ती कुवलयापीडो मृतोप्युदपतद् बत
अधिकं संभृतक्रोधादाजावमृदुलो भवान् ॥ २७

श्लोकं

प्रमदमथ भजन्तौ मल्लशालां भवन्तौ
विविशतुरिभदन्तौ स्कन्धदेशे वहन्तौ ।

हृदयमपहरन्तौ पश्यतामावहन्तौ
मुदमलमसदन्तौ साधुलोकानवन्तौ ॥ २८

श्लोकं

तनुमानतनुर्वनितावितते-
रशनिर्नन्नु माधव मल्लततेः ।
पशुपालजनस्य ननु स्वजनो
विदितोऽयमिति व्यलसो हलिना ॥ २९

श्लोकं

वीक्ष्यैतौ विश्वलोकैरपि तृषिततरैर्विस्मयस्मेरतारैर्-
नेत्रैर्निर्यन्निमेषैर्मुरहर मुहुरापीयमानाखिलांगौ ।
रंगे भान्तौ भवन्तौ सह समुपसरन् मुष्टिकेनापि तुष्ट्या
चाणूरोऽसावराणीत् सबल इह भवानप्यमुं तृप्यदात्मा ॥ ३०

पदं ४ शङ्कराभरणं - एकताळं

अगधर हलधर हन्त भवन्तौ
परमनियुद्धे परिचयवन्तौ
इति गमितौ पुरमरिसमिदन्तौ
नरपतिनाऽधिकमहितोदन्तौ

पल्लवं

भवतोरवलोकनतो हृदये
वीर्यवतोरियमुदयतिमुदये

अवनिभृदवलोकितुमतिलोभी
सदसि नियुद्धं पृथुबलशोभी

प्रियमवनिपतेरयि करणीयं
निखिलजनैरिदमिह महनीयं - भवतोरवलोकनतो

प्रियकृत उदियान्मंगलजालं
विप्रियकर्तुरमंगलजालं
सुशुभाशुभयोरिह जगतीशो
निखिलसुरेशमयो जगतीशो - भवतोरवलोकनतो

शृणु ननु चाणूर नृपाभिमतं
करणीयमितीह समानुमतं
अमुकौ पृथुकौ ननु पृथुलबलैर्-
विहरेव कथं प्रथने कुशलैः - भवतोरवलोकनतो

बकहर बल बालौ न भवन्तौ
बलमिह नियतं बलवतयन्तौ
यदिभं धेनुकमपि हतवन्तौ
प्रसभं बलिनं प्रकुपितवन्तौ - भवतोरवलोकनतो

समुचित इह तत् समरविहारो
नियतमसाविह न हि परिहारो
कृष्ण मया झटिति भवान् घटतां
मुष्टिकनाम्ना मुसली घटतां - भवतोरवलोकनतो

श्लोकं

उक्तैवं तौ भवन्तावपि भुजयुगमास्फोटयजाघटयमाना-
वन्योन्यं विक्षिपन्तौ पुनरपि तरसैवापतन्तौ रुषान्धौ ।
जानुभ्यां जानुयुग्मं शिर इह शिरसा वक्षसा चापि वक्षो
निघ्नन्तौ निष्पतन्तौ निरतिशयरयादुत्पतन्तौ हसन्तौ ॥ ३१

श्लोकं

अन्योन्यं गृह्यमाणौ मुहुरपि बलतो मुच्यमानौ समानौ
वेगादास्लिष्यमाणावधिकदृढमथ भ्रामणैर्भ्राम्यमाणौ ।
मुष्ट्या निष्कुट्ट्यमाणौ निरवधिकबलं स्थापनैः स्थाप्यमानौ
तन्वानौ कर्षणं चेरतुरिह विविधं चालनैश्चाल्यमानौ ॥ ३२

(युग्मकं)

श्लोकं

कोपभरशोणतरलोचनसमेतौ
लोकवरबाहुबलमूलगृहभूतौ ।
लोकयितृभीतिकरमाहवविनीतौ
घोरतरमादधतुराहवमथैतौ ॥ ३३

श्लोकं

बलिनोरनयोरतिबालकयो-
रसमं समरं समवेक्ष्य च वां ।
अनुरागदयाव्यसनाकुलधी-
रबलावलिरीश मिथोऽकथयत् ॥ ३४

पदम् ५ मुखारि - चेन्पट

सखि यो विलोकयति बालबलिनो रणं
स्पृशति तमधर्मोऽयमघकारणं

पल्लवं

वीक्ष्य रणमसममपि वदनमनयोरये

स्थातुमपि यातुमपि न तु पारये

धर्मव्यतिक्रमो भवतीह सुनियतं
तत् सदसि वर्तितुं न तु समुचितं - वीक्ष्य

क्व च किसलयातिमृदुलांगकौ बालकौ
क्व च वज्रनिभतनू मल्लहतकौ - वीक्ष्य

श्रमवारि भृशहारि बालयोराननं
व्यालोकयाखिलजनामोदनं - वीक्ष्य

श्लोकं

श्रुत्वा च दीनं वचनं वधूनां
स्मृत्वा च पित्रोर्व्यसनं दयालु ।
जातौ भवन्तौ व्यवसायवन्तौ
हन्तुं विषन्तौ पुरुपुण्यवन्तौ ॥ ३५

श्लोकं

चाणूरं त्वमपोथयोऽथ पृथिवीपृष्ठे व्यसुं भ्रामणाद्-
रामो मुष्टिकमेष मुष्टिभिरहन् वेगादमैवानुगैः ।
आलोक्येदमुदीर्णरोषभरतो व्याघूर्णमानाशयो
वाक्यं व्याहरदेष भोजनृपतिर्वाद्यं हरे वारयन् ॥ ३६

पदं ६ नाट्ट - चेन्प

अपगमितभूरिमदमपनयत दूरतर-
मसुरकुलनाशपरपशुपयुगपाशं

आहत्य पशुपचयमाहृत्य वसुनिचय-
माबध्य नयत बहिराशु विहताशं

अनिशमपि वसुदेवनहिततरमदसीय-
पितरमपि नयताशु पितृपतिसकाशं

कन्दळितनिरुपमानन्दभरविवशितं
नन्दमपि कलितमावहत सुदुराशं

अहितहितसाधने सततकृतमानसं
जनकमपि मामकं गळकलितपाशं

दूरतरमाकृष्य धूतकृपमाहत्य
भूरिमदमाहुकं नयत लघु नाशं

श्लोकं

भूभृद्कुञ्जरनिस्वनं निशमयन् भूरिक्रुधाऽशुत्पत-
न्नुत्तुंगं बत हर्म्यशृंगममुमापत्यावनौ त्वं हरिः ।
हत्वाऽथ स्वपदं निनेथतरसैवाष्टौ हली पिष्टवान्
कह्वादीन् प्रतिघेन घोरपरिघेणास्यानुजान् सानुगान् ॥ ३७

श्लोकं

कंसो नित्यनृशंसधीरपि भवत्सारूप्यमाप्तो जवा-
ज्जीवानां भुवने हि पुण्यनिवहं जानाति को वा पुमान् ।
वैरेणापि स ते स्मरन् पदमगात् स्नेहादहो किं पुन-
स्तस्मात् त्वत् स्मृतिरुद्धृताखिलमला त्वत्प्राप्तिसिद्धौषधम् ॥ ३८

श्लोकं

तावेतावतिकातरौ स्वपितरावासाद्य सद्यो युवां
तावेतावधिकादरावतिचिरादालोक्य मोदाकुलौ ।
पाशातांशु विभो विमोच्य विनिबध्यप्रेमपाशैर्भृशं
भक्त्या त्वत्पदपङ्कजेषु पतितौ सत्रा प्रमोदाश्रुणा ॥ ३९

श्लोकं

तौ प्रभूतनयौ वीक्ष्य
तौ प्रभू तनयौ युवां ।
सर्वदा भजतां पुंसां
सर्वदाभजतां मुदम् ॥ ४०

श्लोकं

तत्त्वं विदद्भ्यामिति शङ्किताभ्यां
ताभ्यां पितृभ्यामभिवन्दिताभ्यां ।
एतौ भवन्तावकृतोपगूहा-
वेतौ च गामूचतुरात्तमोहम् ॥ ४१

पदं ७ भैरवि - एकताळं

जननि विभो जनक वृथा युवयो-
रभजनतोऽजनि ननु जनिरनयओः
शिव शिव विधिनाऽहतयोरयि नौ
वरमिह गुरुजनसेवनमवनौ

पल्लवं

भवदसभाजनतो बत रमितं

बृहदपराधमिमं नौ सहतं

निजपितृनिकटे खलु विवसन्तो
निरवधिलाळनमपि च भजन्तो
भुवि पृथुका यं प्रमदमयन्ते
क्वचन न तादृशमिह नियतन्ते - भव

अपि भवदन्तिकनिवसनयोग्यौ
सन्ततमावामसकलभाग्यौ
किञ्चिदविन्दाव न नूनमिदं
किन्नु विनिर्माति न दैवमिदम् - भव

किमपि च वृत्तिं शिव शिव पुत्रो
यो न विदत्ते भुवि निजपित्रोः
प्रेत्य यमालयमेतु स नियतं
मृत्युगिरा निजमत्ति च पिशितं - भव

कुशलोऽपि च योऽवति न कुटुंबं
वसुलोभादपगळदवलंबं
श्वसितयुतोऽपि मृतओ नियतमयं
भजति हि महितममुत्र च निरयं - भव

मातुलभवभयपरमातुरयोर्-
मुहुरापतितारिभिराकुलयोः
परतन्त्रकयोरयि बालकयोर्-
दोषमशेषं विषहतमनयोः - भव

दैवादुपनतभवदभजनयोर्-

भवदीयदयाभरभाजनयोः
निजनन्दनयोरनयोरुभयोः
शरणं ननु नौ चरणं युवयोः - भव

श्लोकं

प्रमोहदं वाचमिमां निशम्य
प्रणीय वामङ्कमपेतशङ्कं ।
प्रकाममालिंग्य पित च माता
प्रमोदभारं बिभरां बभूव ॥ ४२

श्लोकं

अथ तौ दधतौ तनयौ सनयौ
प्रणयात् प्रळयाद्विधुरौ पितरौ ।
नयनाम्बळिनाद् गळितैर्ललितै-
रमितैरमृतै रचितौ स्नपितौ ॥ ४३

मङ्गलं श्लोकं

सान्द्रानन्दचिदात्मनि त्वयि विभो सक्षात् परब्रह्मणि
स्वान्तं कान्तधिया निवेश्य रममाणनां रमावल्लभ ।
गोपीनामगणेयपुण्यविभवानां वर्ण्यते केन वा
तत्तादृग्बत भागधेयमहिमा भक्तैकबन्धो हरे ॥ (५४ रासक्रीड)

# Five

## स्वयंवरः

श्लोकं

सामोक्त्या सान्तयित्वा भृशमिति पितरौ प्राज्यमोदाकुलौ तौ
राज्यं न्यस्योग्रसेने ततिमथ भयदूनां यदूनां प्रदानैः
सद्यो हृद्यैः प्रसाद्य प्रणयपरवशं तं विसृज्याथ नन्दं
विद्या लब्ध्वाऽप्य सान्दीपनिमथ भवता दक्षिणार्थेऽर्थितोऽसौ १

श्लोकं

अब्धौ जातु मृतं सुतं मम दिशेत्युक्त्वा गुरोरर्णवं
गत्वा पञ्चजनं निहत्य सहलीधृत्वादरं तद्भवं
मृत्योरेत्य च पत्तनं दरवरं दध्मौ रवं दारुणं
श्रुत्वोपेत्य यमोऽनमत् समगदत्प्रीत्या भवानप्यमुम् २

पदं १ मलहरि – पञ्चारि

यम

धूतदुरितनुतचरित भवदुपागतं
भूतमहित पूतमकृत सद्म सान्प्रतम्

पल्लवं

अयि हरे शृणोतु मम वचोऽवधानवान्
अखिलजनहितैकविधिहिताशयो भवान्

हेतुना तु केन वा युवामिहागतौ?
देवदेव नैव वेद्मि हेतुमागतौ - अयि हरे शृणोतु

सकलदोहळाभिपूरणोद्यतात्मनोः
कमिह पूरयामि दोहळं महात्मनोः - अयि हरे शृणोतु

कृष्ण

धर्मराज विहितकर्मजालनियमितं
वारिराशिपतितमानयाशु गुरुसुतम् - अयि हरे शृणोतु

ननु निजाधिकारहानिरिह न जायते
मम नियोगयोजनेन जीवितेश ते - अयि हरे शृणोतु

तदिह सपदि शिशुकममुकमानयाधुना
देशिकस्य दक्षिणां हि साधयेऽमुना - अयि हरे शृणोतु

श्लोकं

आभाषितेन भवतैवमनेन दत्त-
माचार्यसूनुमुपनीय दिदेश तस्मै
आश्लिष्टनष्टतनयेन ततः प्रमोदा-
दाशासितोऽजनि भवानमुना ससीरी ३

श्लोकं

पौरानामोदयन्नापिथ पुरवरमापूरयन् पाञ्चजन्यं
मित्रं लब्धोद्धवं तं निखिलनयविदामुत्तमं बुद्धिमन्तं
आयासेनालमायास्यति सपति सरोजायताक्ष्यो जनोऽयं

सन्देशैरेवमाश्वासय पशुपवधूरेनमेवं न्यगधीः ४

श्लोकं

आदायाज्ञां त्वदीयामथ रथमधिरुह्याशु तोषेण घोषं
सोऽयं सायं गतोऽरीरमदपि पितरौ ते विशेषैरशेषैः
आलोक्याभेत्य गोप्यो लघु तव सदृशं वेषभूषादिभिस्तं
वीतव्रीळा विलेपुर्विविधमिति विभो विह्वलास्त्वां स्मरन्त्यः ५

पद्यगीतं कामोदरि - पञ्चारि

गोपि

प्रहितवानये त्वां प्रसूकृते
पितृकृतेऽथवा सुन्दराकृते
पशुपराडयं क्रूरधीररं
किमिह तस्य कार्यं व्रजेऽपरं? १

नगरकामिनीकामदोऽद्य ते
सुमुख हे सखा कुत्र वर्तते?
व्रजममाधवं वीक्ष्य चेतना
क्रकचधीर्यमाणेव नोऽधुना २

कथमिमाः स्मरेद् ग्रामकामिनी-
रनुभवन्नयं पौरकमिनीः?
किमु पिकः स्मरेन्निंबमञ्जरी-
रनुभवन्नयं चूतमञ्जरीः? ३

जहति निर्धनं वेशजांगनाः
जहति खल्वकल्यं नृपं जनाः
गुरुमधीतविद्या हि तत्क्षणं

नियतमृत्विजो दत्त दक्षिणं ४

फलविहीनमुर्वीरुहं खगा
विहितभोजना गेहमध्वगाः
दहनदह्यमानां मृगा वनीं
समनुभूय जारोऽन्यकामिनीं ५

स हि तथैव हा नोऽनुभूतवान्
सपदि चावधूयेह यातवान्
बत जनार्दनो निर्दयो भृशं
व्रजजनार्दनो जायतेऽनिशं ६

विरहवेदना जृंभते हि नो
हृदय एव हा तस्य जातु नो
वरहते विधोराधिभागियं
कुमुदिनी तु नैवोडुराडयं ७

अति गते भवे पापजालकं
नियतमाहितं घोररूपकं
निपतिता वयं हन्त दुस्तरे
निरवधौ यतो दुःखसागरे ८

विलपितैरलं विश्वदृक् पुमान्
न यदि वेद नो वेदनामिमां
विगतविग्रहाः प्राप्य तं पतिं
विरहवर्जिताः प्राप्नुमो रतिं ९

श्लोकं

स्मारं स्मारं भवन्तं मुहुरिति विलपनत्यो भृशं निःश्वसन्त्यो
हा हा कान्तेति तान्ता मुमुहुरपि हरे त्वत्प्रिया विप्रयोगात्
आश्वास्यासौ त्वदास्योदितमधुरगिरा तादृशीं वीक्ष्य भक्तिं
विस्मेरास्यांबुजस्त्वां व्रजयुवतिदृशामुद्धवोह्युद्धवोऽगात् ६

श्लोकं

कुब्जामब्जायताक्षीं सरसमुपसरन्नुद्धवेनापि सार्धं
दत्वोपश्लोकसंज्ञं सुतमथ हलिना नन्दयन् गान्दिनेयं
श्रुत्वा कौन्तेयवार्तामममुमथ विसृजन् मागधं क्रोधभारा-
दाप्तं जामात्य घातान्मुहुरपि जितवान् निन्यिषे सैन्यमन्तम् ७

श्लोकं

घोरतरकोपभरयोधवरशोभी
वीरवरभीतिकरभीमरणलोभी
नाथ मथुरामथ रुरोध पृथुरोष-
स्तावदयि देव यवनाधिपतिरेषः ८

श्लोकं

रुन्धाने म्लेच्छनाथे नगरमथ निजान् बान्धवान् द्वारकाया-
माधायो दारयोगाच्चकित इव गतः पत्तनादात्तमोदं
पद्भ्यामाधावमानो यवनपरिवृढेनानुयातो गुहाया-
मालीनोऽमुं व्यतानीः पदहत मुचुकुन्देन भस्मावशेषम् ९

मुचुकुन्दस्तुति

लक्ष्मीकान्त विभो (श्लोकं २१, कंसवधं)
मुरनरकमथन (पदं २, कंसवधं)

तस्मै भूपाय तस्थे व्यतरदपि भवान् मुक्तिदात्रीं च भक्तिं
हत्वा तां म्लेच्छसेनामधिसृति रभसेनाकुलायागताय
दत्वा दर्पावहं माधव विजयमहो मागधायैकवारं
संप्राप्य द्वारकां त्वां पुरटमयपुरद्वारकान्तां ननन्द १०

श्लोकं

भारतीपतिभारत्या रेवतीं रेवताहृतां
हृद्यामुद्वाहयामास सद्यो हलभृता भवान् ११

श्लोकं

अद्धागौरदुकूलबद्धरशना जाताभिजातप्रभौ
स्फीतामोदसुरौ कलिन्दतनयादारा वनन्ताभिधौ
ज्यायांसौ नवकालफुल्लकमलश्रीहारिणौ हारिणौ
रामं त्वामपि रेवतस्य दुहितुर्वन्दे वरं देवरम् १२

श्लोकं

वैदर्भोऽदभ्रशोभाधुतविबुधवधूं रुग्मिणीं सोपि रुग्मी
हृद्यां चैद्याय दातुं समय इह समारब्धवानिद्धमोदं
ज्ञात्वा वार्तामथैतामधिकतरशुचा व्याकुला बालिका सा-
वाबाल्यारूढभावा त्वयि पुनरहिनोद्वाडवं वासुदेव १३

श्लोकं

प्रोद्दामांगजबाणसंगजरुजा प्राप्तौ च ते संशया-
च्चैद्योद्वाहविशङ्कयाप्यवशतां यान्ती श्वसन्ती च सा
शय्यायां लुठतीह जामि रुदती पर्याकुलं जाग्रती
खिन्नांगीति चिचिन्त हन्त भगवन्नाळिजनालंबना १४

पदं २ मुखारि - चेन्प

रुग्मिणि

शरनागतशरणदचरणाब्जं
भुवनामोदनवदनजिताब्जं
मधुनाशनसविधमितो गतवा-
नधुनापि स कुत इह नागतवान्

पल्लवं

हरिरिह जगदभिमतसाधयिता
मम तु किमभिमतमभिपूरयिता

दमघोषसुतो मम पुरमागा-
दुरुघोषयुतो ननु पुरुवेगात्
रजनिव्यवहित एष विवाहो-
प्यजनि बताद्य तु मेऽसुखवाहो - हरिरिह

त्रिजगति विदिते मुहुरतिलळिते
मम मति रंजिते धावति दयिते
मतिमतिगहनां कमलाजाने-
रहमतिकृपणा किमपि न जाने - हरिरिह

यदि किमपि च हन्त पुरा सुकृतं
व्यतिगतजननेषु मया तु कृतं
दयितो भवतु स वसुदेवसुतो
न तु जातुचिदपि दमघोषसुतो - हरिरिह

नळिनेषुगृहिण्यपि कमनीयं
भुवनेषु तममुमतिकमनीयं
यदि पश्येन्निजपतिशरनिवहैर्-
विदलितहृदया वितपेदसहैः - हरिरिह

शैशव एव ममातिथिजनतो
रागवशं गुणगणनिशमनतो
हृदयं कृतपदमिह पुंसि परे
न तु पुनरभिरमते पुंसि परे - हरिरिह

अबलैकबलोपि स मे हृदयं
मदनो हि दुनोति शरैरदयं
बलसखकृतपदमपि किमहो नो
कुरुते जगति विवेकविहीनो - हरिरिह

यदि स विनिन्दन्नसुनाथो मा
विसृजेदहमपि चासूनवमा
सति च तथा सुयशस इह भूयो
भविताऽयश इति दूये भूयो - हरिरिह

श्लोकं

एवं चिन्ताभरान्धां मुरहर मुदितामातनो दातुरां ता-
माप्तो विप्रोऽयमाप्तो रहसि तव खलु श्रावयित्वाथ वार्तां
प्राप्ताप्याश्वासमेषा पुनरपि च हरे हन्त शङ्कामयन्ती
वाचां तां विश्वसन्ती विवशमति तवाप्तिप्रतीक्षैव तस्थौ १५

श्लोकं

विष्वक्सेनोऽयमयाति हि नृपनिवहो भद्ररूपौ बतासौ

कृष्णोऽभ्येति द्विपौघो व्रजति खलु पुरीमच्युतोऽसौ स्ववृत्तात्
विप्रौघो वाचमेवं पुरजनकथितां बालिका सा निशम्य
प्रोद्यत्प्रोद्दाममोदव्यसनशबळधीः कां दशां वा न भेजे १६

श्लोकं

तावत् प्राप्तो बतैको मधुमथन भवान् दिव्यया देहकान्त्या
त्रैलोक्यं क्षोभयन्त्या मदनमदभरं दूरमुत्सारयन्त्या
स्त्रीणां पुंसां च चेतो दृशमपि च हरन्नाञ्चितं मञ्चदेशं
भीष्मेणाभ्यर्चितोऽसावलममलमकरोत् प्रीणयन् पौरलोकं १७

श्लोकं

शृंगारोऽम्गीकृतांगः किमु महितविवाहावलोकार्थमागा-
दगीकृत्यांगजोऽअंगम् त्रिभुवनकमनं संगतो वाऽम्गनार्थी
किं वा भूमौमनःसंवननमयपरब्रह्मविद्यैव मूर्ता
विस्मेरैर्विश्वलोकैर्विविधमिति भवान् पङ्कजाक्षाशशङ्के १८

श्लोकं

चन्द्रो वाऽयमुदेति सान्द्रसुषमो लक्ष्मात्र नो लक्ष्यते
किं वा सारसमेव शारदमिदं कुत्रापयातं पयः
एवं संशयिताशयेन निपतल्लीलावलोकेन ते
लोकेनाननमित्यनल्पकुतुकं पश्चाद्विभो निश्चितं १९

श्लोकं

काचित्पुण्यैरगणैर्यति पुरुषमणेरुर्वरापार्वणेन्दोर्-
जायेतामुष्य जाया प्रतिनवसुषमामण्डलामग्नमुर्ते
धन्यां मन्यामहे तामिति नरकरिपो गाढमुत्कण्ठिताभिर्-
वैकुण्ठोत्कण्ठमाभिर्युवतिततिभिरुद्वेलमुद्वीक्षितोऽभूः २०

श्लोकं

आनर्ताधीश्वराद्यैरथ सह सहसाऽऽनर्तबद्धाभियोगै-
रानर्तो वीरलक्ष्म्याः प्रणयविवशमानर्त तत्राग्रजस्ते
रुद्धार्णो रुग्मिणी तु प्रवणमति सखी विप्रपत्नीसमेता
गत्वा गुप्ता भटौघैः कृतनतिरिति तां त्वद्गतात्मा ययाचे २१

पदं ३ इन्दिश - चेम्प

रुग्मिणिः

अहमयि दयिता हि भवानि हरे-
रिह विहतिं देवि भवानि हरेः

पल्लवं

अभिमतमभिपूरय तरसा मे
नतजनवरवितरणकृतकामे

दमघोषसुतो न तु परिणयता-
मनघे तव मां परिचरणयतां - अभिमत

विपदावलिपरिहरणे निपुणं
मम ते पदमुरुकरुणे शरणं - अभिमत

श्लोकं

याचित्वैवं भवानीमथ विधिवदिमां पूजयित्वा च भक्त्या
निष्क्रान्ता सा निजाळीकरनिहितकरा नम्रकम्राननाब्जा
क्षोणीन्द्रान् क्षोभयन्ती दिशि दिशि निभृतं लोकयन्ती चरन्ती
भान्तं हन्ताऽलुलोके मदनमिव तथा मूर्तिमन्तं भवन्तं २२

पद्यगीतं तोटि - चेन्प

तामथ स चारुतरतामरसनेत्रां
कामशितबाणशतकामहतगात्रां
लोकयति भूमिपतिलोक इह मोदा-
न्नाथ रथमाशु च निनेथ गतखेदाम्

देव सहसैव बलदेवसहकृत्वा
रुग्मिणमनीकमपि तिग्मयुधि जित्वा
स्वीयमुपनीय महनीयमथ गेहं
तामजित नाथ कृतवानसि विवाहम्

श्लोकं

बालां व्रीळाकुला तां कथमपि च विधायोक्तिभंग्या विधेया-
माधायाङ्के तु पङ्केरुहनयन समालिंग्य कम्रांगवल्लीं
वीक्षं वीक्षं च चुंबन् मुहुरपि चिबुकं प्रोन्नमय्याननाब्जं
पायं पायं च रागादधरमधु भवान् नैव तृप्तिं प्रपेदे २३

श्लोकं

सत्राजिन्न ददौ स्यमन्तकमहो जातु त्वयाप्यर्थितं
तद्भ्राता मृगयारतो वनमितो धृत्वा प्रसेनो मणिं
सिंहोऽमुं हतवान् मणौ पिशितधीः सिंहं न्यहन् जांबवान्
रत्नं चादित बालके मणिहरं त्वामेव लोकौ जगौ २४

श्लोकं

कृष्णो बाल्येप्यमुष्णाद्दधिघृतनवनीतांशुकाभीरनारीर्-

भौजंगं शांखचूढं वसु पुनरधुना भीष्मकन्यां समक्षं
रत्नं चाप्येष एव क्व पुनरपसरेन्मानसे वासना सा
तस्मादस्माभिरस्मिन्निह निवसति रत्नादि यत्नेन गोप्यम् २५

श्लोकं

आकृष्टो निखिलैर्भवानिति ययावाकृष्टसेनो वनं
शङ्कां पङ्कजलोचन व्यपनयन् वीक्ष्य प्रसेनं हतं
गत्वा जांबवतो गुहामिह शिशुं रत्नं च दृष्टोद्यते
हर्तुं तत् तदवेक्ष्य संभ्रमवशाच्चुक्रोश धात्री भृशम् २६

पद्यगीतं केदारगौडं - चेन्प

अथ कोपवता द्रुतमापतता
हृदि भूमिसुतापतिमावहता
अनुभाववताऽधिकभाववता
बत जांबवता जघटे भवता १

उदयावनसंहरणे परमं
ननु कारणमीश भवन्तमिमं
स परं पुरुषं पुरुषं हि परं
हृदये कलयन् विदधे समरम् २

शल्यघनपट्टसपरश्वधकृपाण-
प्रास सृग शक्तिमुखशस्त्रनिकरेण
ग्राव तरुबाहुचहरणैरपि स च त्वं
विव्यधथुरव्यथमथान्तरिततत्त्वं ३

अष्टयुतविंशतिदिनानि समसत्त्वं

शिष्ट रणमादधथुरिष्टद स च त्वं
मुष्टिशतपिष्टहृदवेत्य तव तत्त्वं
पुष्टरति सोऽवदत तुष्टहृदपि त्वम् ४

पदं ४ केदारगौडं - चेन्प

जांबवान्:

त्वामवकलये परमयि पुरुषं
भूभरहृदये यदुकुलजनुषं

पल्लवं

शृणु गिरमज नन्दन भक्तिमतां
परम हरे रामसहायमितां

यो हरिमर्कजमतनुत बन्धुं
वनभुवि मुरहर वन्दे तं त्वां - शृणु

यो बालिनमनुपमबलवन्तं
हतवान् मुरहर वन्दे तं त्वां - शृणु

योऽकृत सिन्धौ नळकृतबन्धं
सेतुं मुरहर वन्दे तं त्वां - शृणु

यो महति रणे दशवदनं तं
न्यवधीन्मुरहर वन्दे तं त्वां - शृणु

नवनैरलमलमधुना भवता
किमिति समागतमिहजगदवता - शृणु

श्रीकृष्ण

मयि मणिमूलं कृतमभिशापं
कपिवर विनुदन् बिलमिदमापं - शृणु

क्रियतामभिमतमयि मम तरसा
भवता हरिवर पुरुतरतरसा - शृणु

श्लोकं

श्रुत्वा जाम्बवतेति ते निगदितं दत्तं जगन्मोहिनीं
धृत्वा जांबवतीं मणीमपि विभो त्वन्मुष्टिपिष्टं हरेः
स्पृष्ट्वांगं सरुजं करेण विरुजं कृत्वा सुधावाहिना
गत्वाधा रमणीं गृहे वरमणीं सत्राजितेऽदा मुदा २७

श्लोकं

सत्राजिताऽपत्रपयोपसर्पता
सत्राजिता पात्रविदा समर्पितां
तां सत्यभामां सदसीह सादरं
त्वं सत्यभामासहितोऽप्युदूढवान् २८

श्लोकं

नीतामेतां सखीभिःकथमपि सविधं नम्रवक्त्रारविन्दां
धूतां वातेन रंभामिव तरळतनुं सम्भ्रमोद्भ्रान्तनेत्रां
बालां हेलाविधूताखिलविबुधवधूलोकहेवाकजालां
रागावेशादगादीरनुनयसरसां शारदामादरेण २९

पदं ५ शङ्कराभरणं - चेम्प

कृष्णः

दयिते जनमिममयि ते परिजन-
मिति परिकलय सुशीले
सुशिथिलबाले शिथिलय चाऽलं
ह्रियमपि भियमपि बाले

पल्लवं

ननु भज भामे दृढतरकामं
जनमिममनितरकामं

इयमाकुलता ननु वरतनु ते
तनुते बत मम खेदं
भवसि यदेवं रहसि च हृदयं
विशरणमेव ममेदम् - ननु भज

मुखमुन्नमय स्मितचन्द्रिकया
परिहर मम परितापं
श्रुतियुगमयि मम निशमयितुं भृश-
कौतुकमिह पिकलापं - ननु भज

विहसितभृंगैर् विलसदनंगै-
स्सकृदपि सुखयापांगैः
स्मरकृतभंगं सुदति मदंगं
शिशिरय शिशिरैरंगैः - ननु भज

सुन्दरि सफलय हन्त रसं तव

सुमधुरमधरसुधायाः
मुखचुंबनमुखयाचनया किमु
मयि करुणा करणीया - ननु भज

चिकुरो रुचिरो वदनं कमनं
जघनं घनमपि वाते
निखिलावयवा मम मतिमबला-
माकृष्य नयन्त्येते - ननु भज

मम भवती परमवलंबो मम
भवती वंशपताका
मम भवती ननु जीवनमपि मम
भवती मुखशशिराका - ननु भज

मम भवती वरमण्डनमपि मम
भवती भाग्यमनूनं
मम भवती ननु जनिफलमपि मम
भवती निधिरिह नूनं - ननु भज

मम भवती हृदि निर्वृतिरपि मम
भवती दृगमृतधारा
मम भवतीपरमिह सुहृदपि मम
भवती सन्पदुदारा - ननु भज

नतमुखि दयिते जगदभिरामे
जितकुसुमायुधरामे
द्रुतमनुकूला भव ननु भामे
सुतनु मनोहरभा मे - ननु भज

श्लोकं

वाचा व्रीळाविहस्तां कथमपि च रहस्तां विधेयां वितन्व-
न्नाधायाङ्केऽम्गमालिंग्य च किमपि भवानास्यबिंबं च चुंबन्
लोलापांग्या नतांग्या भुवनकमनलावण्य वेण्या रमण्या
साकं लोकाधिनाथाधिकरुचि भुवनैकाभिरामाभिरेमे ३०

मंगळं

केळीलोलमुदारनादमुरळीनाळीनिलीनाधरं
धूळीधूमळकान्तकुन्तळभरव्यासङ्गि पिञ्छाञ्चलं
नाळीकायतलोचनं नवघनश्यामं क्वणत्किङ्किणी-
पाळीदन्तुरपिङ्गलांबरधरं गोपालबालं भजे

# Six

## बाणयुद्धम्

श्लोकं

इन्द्रप्रस्थाय पार्थप्रियकृदथ गतो यामुने काननान्ते
कालिन्दिं लोभयन्तीं हृदयमुदवहत् खाण्डवानन्दिताग्निः
भूय पैतृष्वसेयीं नृपसदसि भवान् मित्रविन्दामविन्द-
ज्जित्वा सप्तापि सत्यामहृत वृषवरान् नग्नजिन्नन्दनां ताम् १

श्लोकं

भद्रां तां भ्रातरस्ते ददुरधिकमुदा देव सन्तर्दनाद्या
लक्षं तोयैकलक्ष्यं सपदि विदलयल्लक्षणामप्यवापः
इष्टाभिस्ताभिरष्टाभिरपि परिरमन् भौमचेष्टां स कष्टां
श्रुत्वा भामासहायः स्मृतसमुपनतं तार्क्ष्यमारुह्य चागाः २

श्लोकं

प्राप्य प्राग्ज्योतिषाख्यं पुरवरमधिकं दुर्गमं दुर्गवर्गैः
कौमोदक्या गिरीन्द्रानपि वरणगणं शस्त्रसार्थं शरौघैः
चक्रेणाग्न्यंबुवायून् दृढतरमुरपाशावलीं नन्दकेन
क्षिप्रं संहृत्य दध्मौ प्रसभमथ भवान् पाञ्चजन्यं च धन्यं ३

पद्यगीतं भैरवि - चेम्पट

मुखरं स्वदरं मुखशीतकरे
निदधद्दयितासहितोनु हरे

गरुडे व्यलसोऽथ रणे लषतां
निनदेन भयं जनयन् द्विषतां १

स निशम्य तदा निनदं निलया-
दसुरोऽथ मुरोऽतिरुषा निरयात्
मुखपञ्चकनिःसृतनिस्वनितैर्-
मुखरं भुवनं रचयन्निमितैः २

अभिपत्य दुरत्ययविक्रमवान्
अभिपत्र्यधिपत्युरुसार्थकवान्
निशितत्रिशिखप्रमुखायुधवान्
व्यकिरत्त्वयि पत्रिवरान् बलवान् ३

द्रुतमच्छिनदच्युत तद्विशिखान्
निजपत्रिवरैरथ तीक्ष्णशिखान्
व्यसृजच्च भवान् विशिखप्रवरान्
प्रसृतप्रतिघो युधि दीप्रतरान् ४

अनवेक्ष्य तदाऽऽशु स पक्षिपतिं
प्रति पक्षहतप्रतिपक्षततिं
व्यसृजत् त्रिशिखं ज्वलदग्निशिखं
व्यनदच्च दिशो दलयन्नपि खं ५

त्वमिदं लघु पत्रयुजार्दितवान्
अरिमप्यरिणाजित मर्दितवान्
सबलेऽथ मुरे निहते बलवान्
नरको रुषितः स्वयमागतवान् ६

अधिरूढवतो युधि रूढमिभं

सुदुरासदशूलभृतः प्रसभं
त्रिशिखप्रहृतेः पुरतो हृतवान्
गळतोऽस्य शिरोऽरिवरेण भवान् ७

श्लोकं

घातं नीतेऽतिघोरे नरक इह भवानस्य पुत्राय दत्वा
राज्यं वाचा धरित्र्या भवसख भगदत्ताय गेहं प्रविश्य
कारागारे निरुद्धा निजपुरमनयद्व्यष्टसाहस्रनारीः
स्वर्गं प्राप्यादितेः कुण्डलमदित जितेन्द्रोऽहरत् पारिजातं ४

श्लोकं

भामरामे निधाय द्युतरुमुदवहो द्व्यष्टसाहस्रनारीः
प्रीत्या च प्रत्यगारं विहितबहुवपुर्मोदयामासिथाऽमूः
त्वद्रूपालोकनोद्यत्कुतुकसुरमुनीद्रातिविस्मापकैस्त्वं
तैस्तैर्लीलाविशेषैः प्रतिनिलयमलं रेजिषे रेमिषे च ५

श्लोकं

रुग्मिण्या प्रियया कदापि शयने प्रीत्या शयानो भवान्
सुनुं ते सदृशं दिशेति सुदृशे नाथानया नाथितः
नूनं ते तनयं दिशामि गिरिशं देवं प्रसाद्याचिरा-
दित्युक्त्वापतगाधिपेन बदरीमागान्मुनीन्द्रावृताम् ६

श्लोकं

घण्टाकर्णोऽपि निघ्नन् मृगततिमितवान् सानुजन्मा सुजन्मा
सानन्दं नन्दसूनो नरकहरहरे कृष्ण रामेति गायन्
आलोक्योपेत्य च त्वामवददतिमुदा भक्तलोकावतंसो
भक्त्या मोमुद्यमानो भवसख स भवानप्यमुं भक्तबन्धो ७

पदं १ घण्टारं - चेन्प

घण्टाकर्ण

पुरुषवर को भवानिह कुतो यातवान्
मम भवोऽद्य फलवान् ननु जातवान्

पल्लवं

सौम्य ननु सान्प्रतं भावमवलोक्य ते
सम्मदो मानसे मम झृंभते

त्वयि तु मम मानसं सजति पुरुषोत्तमे
यदुकुलमणौ कृष्ण इव सत्तमे - सौम्य ननु

कृष्ण

ननु पिशाचकुलशेखर यदुकुलेऽभवं
पापनृपपीडितामवितुं भुवं - सौम्य ननु

किञ्चिदहमुद्दिश्य वीक्षितुं शङ्करं
द्रुतमयाम्ययमखिलजनशङ्करम् - सौम्य ननु

भक्तजनसत्तम भवानपि च को नु वा
त्वत्सवितवर्त्यसावपि को नु वा - सौम्य ननु

घण्टाकर्ण

त्वामेव लोकितुं शिवपदात् द्वारकां
शिवसेवको यामि शिवदायिकां - सौम्य ननु

जगति घण्टाकर्ण नामधेया वयं
भवति भक्ता विभो सोदरोऽयम् - सौम्य ननु

श्लोकं

इत्युक्तोपायनाग्र्यं द्विजशवशकलं सानुजन्मा तवाग्रे
नृत्यन् न्यस्य प्रमोदादुदितनिजतनोः पादमूले पपात
कारुण्यार्द्रः कराभ्यां वपुष परिमृशन् दिव्यदेहो दिवं तौ
नीत्वा गत्वाऽथ रूप्याचलमचलतरात्मा तपोऽतप्यथास्त्वम् ८

श्लोकं

सुस्मेरास्यं प्रसादाद्भुतविवशतरैर्विश्वदेवोपदेवैर्-
भुतैः प्रेतैः पिशचैरपि तमनुगतं शैलकन्यनुयातं
नसान्यस्तांगुलीकं त्वरितमुपगतं विस्मयोत्फुल्लनेत्रं
व्यालोलाहीन्द्रहारं गिरिशमजित तुष्टोऽथ तुष्टोथ दृष्ट्वा ९

पदं २ घण्टारं - चेन्प

हे देवदेव जय हे वामदेव जय
हे वातदेव जय जय जय पुरारे

शरदुदितशिशिरकर रुचिरतर रुचिविसर
सुभगतम तनुसुषम जय जय पुरारे

तनुविततफणिपते पदविनतसुरपते
भव गिरिश पशुपते जय जय पुरारे

मुक्तिपरभक्तजनचित्तमयभित्तिलिखि-

तार्तिहरमूर्तिवर जय जय पुरारे

जय शर्वरीशधर जय शर्व शूलधर
जय सर्वदेववर जय जय पुरारे

नळिनसमनयन जय नळिनशरदहन जय
नवनपरभुवन जय जय जय पुरारे

आक्षेपवचनशरविक्षेपतरळतर-
दक्षेऽपकारकर जय जय पुरारे

श्लोकं

विहितमहिततोषा तावकी तावदेषा
तनुरनुपमशोभा कल्पितानल्पलोभा
मुहुरपि जनमेतं भूरिभक्त्या समेतं
मुखरयति पुरारे चन्द्रचूड स्मरारे १०

पदं ३ पाटि - चेन्प

श्रीकृष्ण

कलितनदीवरकपिशजटाभर-
खचितनिशाकर पुरहर जय जय

पल्लवं

भवभयभञ्जन भव मृड जय जय
फणिगणभूषण पुरहर जय जय

लोकभयानकपावकलोचन-

भासुरफालक पुरहर जय जय - भवभयभञ्जन

चिल्लीयुगळमतल्लीविदलित-
वल्लीमदभर पुरहर जय जय - भवभयभञ्जन

निन्दितकुवलयमञ्जुळलोचन-
नन्दितकुवलय पुरहर जय जय - भवभयभञ्जन

शुकतुण्डकमदभरखण्डकरुचि-
मण्डितनासिक पुरहर जय जय -भवभयभञ्जन

बिंबकदंबविडंबकडंबर-
कम्रतराधर पुरहर जय जय -भवभयभञ्जन

युक्ताखिलगुणमुक्ताफलगण-
मुग्धामलरद पुरहर जय जय - भवभयभञ्जन

चञ्चलकुण्डलिकुण्डलमण्डल-
मण्डितगण्डक पुरहर जय जय - भवभयभञ्जन

हालाहलरसहेलाकबळन-
काळामलगळ पुरहर जय जय - भवभयभञ्जन

भुजगवरान्तरभृशतरदन्तुर-
पृथुलभुजान्तर पुरहर जय जय - भवभयभञ्जन

परशुमृगाभयवरदविराजित-

मृदुलभुजालत पुरहर जय जय - भवभयभञ्जन

चलदलदलकुलरुचिभरहृतिपर-
रुचिरतरोदर पुरहर जय जय - भवभयभञ्जन

अजिनवरावृत जघनभरादृत-
फणिरशनाशत पुरहर जय जय - भवभयभञ्जन

मदकुञ्जरकर मदभञ्जनकर-
मञ्जुतरोरुक पुरहर जय जय - भवभयभञ्जन

त्रिभुवनलोभन रुचिभरभाजन-
शुभतरजानुक पुरहर जय जय - भवभयभञ्जन

मदननिषंगाधिकभंगावह-
मृदुजंघायुग पुरहर जय जय - भवभयभञ्जन

नळिनायुधनळिकाधृतगुळिका-
यितमृदुगुल्फक पुरहर जय जय - भवभयभञ्जन

कमठकुलाग्रग कलहसदाग्रह-
कमनपदाग्रक पुरहर जय जय - भवभयभञ्जन

सुजनाशय सुजलाशय सुखशय-
चरणकुशेशय पुरहर जय जय - भवभयभञ्जन

गिरिजापांगावलिरंगायित-

निखिलांगाञ्चित पुरहर जय जय - भवभयभञ्जन

शारदनीरदनिकरनिकारद-
रुचिररुचीभर पुरहर जय जय - भवभयभञ्जन

विनमज्जनसुखरसविनिमज्जन-
विसृमरसज्जन पुरहर जय जय - भवभयभञ्जन

श्लोकं

त्वदीयानाममेयानां
गुणानामनुवर्णनात्
परमेश विभो को वा
विरमेत् परमाद्भुतात्

पदं ४ कानक्कुरुञ्जि - पञ्चारि

सकलशमलहरणनिपुणपदपराग ते नमोस्तु
कमनचरणकमल पशुपते नमोस्तु ते

पल्लवं

शारदांबुदोपमांग चारुचन्द्रखण्डचूड
चारणादिवन्द्य पशुपते नमोस्तु ते

प्रपदरुचिभिरधिकसुभगचरणकटक ते नमोस्तु
शरधिसदृशजंघ पशुपते नमोस्तु ते - शारदांबुदोपमांग

भुवनसुभगबहळसुषमजानुयुगळ ते नमोस्तु
सुलळितोरुयुगळ पशुपते नमोस्तु ते - शारदांबुदोपमांग

जघनविलसदजिनकलितभुजगरशन ते नमोस्तु
भुवनभवनजठर पशुपते नमोस्तु ते - शारदांबुदोपमांग

तरळबहळभुजगसुभगबाहुविवर ते नमोस्तु
गरळगहन कण्ठ पशुपते नमोस्तु ते - शारदांबुदोपमांग

स्वकरविलसदभयवरदपरशुहरिण ते नमोस्तु
भुवनकमनवदन पशुपते नमोस्तु ते - शारदांबुदोपमांग

अधररुचिभिरधिकरुचिरमृदुलहसित ते नमोस्तु
महितमधुरवचन पशुपते नमोस्तु ते - शारदांबुदोपमांग

नयननळिनयुगळविगळदधिककरुण ते नमोस्तु
भुजगकमनकर्ण पशुपते नमोस्तु ते - शारदांबुदोपमांग

विहितमदनदहननिटिलनयनदहन ते नमोस्तु
शिरसि लसितसोम पशुपते नमोस्तु ते - शारदांबुदोपमांग

तुहिनशिखरिदुहितृसततलसितसविध ते नमोस्तु
निगमनिवहवर्ण्य पशुपते नमोस्तु ते - शारदांबुदोपमांग

श्लोकं

एवं देव स्तुतोऽसौ सपदि पशुपतिः पाणिना पाणिपद्मं
सामोदं सम्स्पृशंस्ते सरसमिति जगौ सस्मितं विस्मितात्मा
प्राप्यं किं पूर्णकाम प्रणतवरद ते नूनमेनां तपस्यां
शस्यां तस्यातनोर्मे नयनहुततनोरुद्भवायातनोस्त्वं १२

श्लोकं

रुग्मिण्यां ते रमण्यां द्रुतमजित भवेदंगजन्माऽम्गजन्मा
प्रद्युम्नो नाथ नाम्ना य इह विशसिता शंबरं संगरान्ते
उक्तैवं कोरकीकृत्य स करकमलं मूर्ध्नि पुष्टावधानं
विश्वोत्कृष्टापदानं पुररिपुरपि तुष्टाव तुष्ट्या भवन्तम् १३

पदं ५ कुरिञ्जि -चेन्प

श्रीपरमेश्वर

जगदुदयभृतिविलयरचनमयविहृतिचय-
ततहृदय विततदय विजयसख जय विभो

पल्लवं

जगति के यदुपते निरवधिकगुणतते
नुति विधावीश ते किमपि पुनरीश ते

खरकिरणमदहरण खरकिरणगणशरण
रथचरणधरचरणचण विजयसख जय विभो - जगति

शरणगतकृपणजनमरणभयहरणभृश-
निपुणमृदुचरणयुग विजयसख जय विभो - जगति

प्रणतसुरशरणवर कृपणनरभरणकर
धरणिभरहरणपर विजयसख जय विभो - जगति

निगमनुत निजचरितलसदमृतरसमुदित-
बहुसुकृतमुनिविनत विजयसख जय विभो - जगति

जलधिपतिदुहितुरतिविहृतिसुभगतर-
विपुलवरभुजविवर विजयसख जय विभो - जगति

वलमथनमणिकिरणमदमथनरुचिसदन-
भृशकमनसदपघन विजयसख जय विभो - जगति

श्लोकं

स्तुत्या त्वामन्त्र्य तुष्टं पुरमिह शिपिविष्टोऽतितुष्ट्या प्रविष्ट-
स्तूर्णं दुर्वर्णशैलात् त्वमपि निजपुरं श्रीसुपर्णाधिरूढः
रुग्मिण्यै वर्णयामासिथ तदथ मुदं साऽऽप चाऽजीजनस्त्वं
भार्यास्वार्यासु भूयो दश दश सुकुमारान् कुमारानुदारान् १४

श्लोकं

प्रद्युम्नः सूतिदाम्नः प्रथम इह सुतः शंबरेणांबुराशा-
वस्तो ग्रस्तो झषेण प्रददुरथ झषं शंबरयाशु दाशाः
तुन्दे भिन्नेऽस्य दैत्याधिपवचनकरी वीक्ष्य मयावती तं
पुत्रं ते कृत्यमूढा सुरमुनिवचनात् पोषयमास गूढात् १५

श्लोकं

हत्वाऽऽजौ शंबरं शं वरमिह जनयन् पत्तनं त्वत्तनूजः
प्राप्तो रत्याथ पुत्रीमथ समुदवहद्रुग्मिणो रौग्मिणेयः
पौत्रीमस्यानिरुद्धोऽप्यवहदथ रुचा रोचनां रोचमानां
भ्राता तत्रान्तरे ते हत इह सहसा द्यूतवैरेण रुग्मी १६

श्लोकं

जातु स्वप्नानुभूतं निशि निजनगराच्चित्रलेखोपनीतं

शुद्धान्तेऽत्यन्तमोदं समुषितमुषया बाणबाणैर्निरुद्धं
श्रुत्वा तत्रानिरुद्धं कलहरुचिमुनेर्निर्गतो मित्रवर्गै-
स्त्र्यक्षेणारक्षितं शोणितपुरमरुणो दारुणो रोषभारात् १७

श्लोकं

घोरोऽभूत् सन्प्रहारो मुरहर तव वा सावकानां च तावत्
साकं बाणेन बाणाननवधि किरता तद्भटैरुद्भटैर्वा
भस्मीकर्तुं बलं ते व्यवसितमनसा भूतभर्त्रापि भूतैः
शर्वं तं स्वभुतैरपि सह सहसैवाजयो वासुदेव १८

श्लोकं

सन्तोषादथ हन्त भवन्तौ
सन्ततमानत लोकमवन्तौ
धन्यावूचतुरन्योन्यं ते
सैन्यविराजिरणावन्यन्ते १९

पदं ६ माळवगौडं - चेन्प

शिव

तव हरे मया ममापि हृदि मोहदा
यदजितं जेतुमहमीहे भवन्तं
यदुवर यथभिमत मखिलजगदुदलय-
पालनविधानेन हन्त विहरन्तम्

पल्लवं

विजयपरहृदय जय सकलेश पशुपते
भव हर वृषाकपे सत् प्रभो मापते

स्मरति न तु लोक इह मोहितो मायया
तव चरणमिदमखिलजनसेवनीयं
विषजति च विषयेषु विरतिविरसेष्वमृत-
मपहाय विषमेव बत सेवतेऽयम् - विजयपरहृदय

द्वारमपवर्गगमने पुनरपावृतं
बत चिराद् भवमवाप्यापि नरलोके
विषयेषु विषजति हि यो मूढमारूढ-
पतितमिह सन्तो वदन्ति तमनेके - विजयपरहृदय

अविनीतमपनीय दूरमवनीयमव-
नीयेति विरचितो नियतमवतारो
भवता तु पदपतितभवतापभरहरण-
भरितादरेण धरणावलमुदारो - विजयपरहृदय

बाणोऽयमधिकमविनीतोऽपि भवतो न
विशसितुं समुचितो विबुधकुलवैरी
नतपरायण मया खलु पुरा ननु मुरा-
न्तक वितीर्णाभयो मम तु परिचारी - विजयपरहृदय

कृष्ण

तरुणेन्दुचूड करुणंबुधे मम च पर-
मनुमतैव भवता वागभिहितेऽयं
पुरहर पुरा विरोचनकुलोदितमिह न
विशसिताऽहमिति संश्रुतमिदमहेयम् - विजयपरहृदय

मदभारहरणाय तव चरणसेविनो-
प्यदलयममुष्य पृथुभुजनिकायं

ननु सखे पशुपते परमतो बलिसुतो
धृतचतुर्भुज एव जगति भविताऽयम् - विजयपरहृदय

समतत्त्ववेदितरि सर्वस्ववितरितरि
चैतस्य पितरि यद्वदयि मम दासे
सम्मदो ननु मनसि झृंबते शश्वदपि
तद्वदिह तस्य तनयेपि तव दासे - विजयपरहृदय

न च मृतिर्न च जरा न च कुतोपि च भयं
न च पराभवकथाप्यस्य ननु भूयात्
महितेषु निखिलेषु निजकेषु भृतकेषु
परमेष परमेश नियतमपि भूयान् - विजयपरहृदय

त्वां जगति यो भजति मामपि च यो भजति
तावुभावपि गिरिश तव मम च दासौ
निखिलगुणवारिधे निरुपमयशोनिधे
नामसु भिदां विना का नौ भिदाऽसौ - विजयपरहृदय

श्लोकं

अन्योन्यं तौ प्रसन्नाविति किमपि हसन्तौ भणन्तौ भवन्तौ
यातौ स्वं स्वं निशान्तं निजनिजभृतकैरुल्लसन्तौ नितान्तं
निध्यायाथानिरुद्धं सह च दयितया हन्त ते बन्धुता सा
मग्ना सम्मोदसिन्धौ मुरमथन यथा नष्टमासाद्य रत्नम् २०

श्लोकं

प्रद्युम्नाद्याः कदाचित् सरसमुपवनं प्राप्य सम्क्रीडमानाः
दैवादालोक्य बालाः कमपि च सरटं हन्त कूपेऽन्धरूपे
उन्नेतुं ते न शक्ताः कृतविविधनयास्त्वां जगुस्तामवस्थां

गेहात् प्रस्थाय वेगात् सदयमुदनयो विप्रशापार्दितं तम् २१

श्लोकं

तव भास्वत्करस्पर्शाद्-
राजन् राजा करांबुजं
अयं कोरकयन् स्वीयं
कलङ्कं तु जहावहो २२

श्लोकं

श्रुत्वा वार्तां तदीयां तदनु तदुदितां तं नृहंसं नृगम् त्वम्
सद्यो नाकं निनेथाऽजित सुकृतवतामग्रियेष्वग्रगण्यं
आकर्ण्योदीर्णमोदाद्भुतविवशतरांस्तच्चरित्रं विचित्रं
प्रीत्या भृत्यानभाणीः परममिह हितं बोधयन् माधवामून् २३

पदं ७ आहरि - चेन्पट

कृष्ण

शृणुतादरतो बत नृगनृपते-
रुपदेशपरं सुमहितचरिते
बहुमतिरिह का मादृशदाने
स्मृत इह महिते नृगनृपदाने

पल्लवं

न हरत न हरत धृतमोहभरा
महिसुरवसु किमपि च लोभपरा

नाकाधिकभोगादिकसुकृतं
शोकाय फलावसितौ नियतं
अर्पितमिदमिह मयि बोधमये

मुक्तिदमिति कलयत यूयमये - न हरत

तिष्ठतु निखिलं पुरुसुकृततती
द्विजशापेन विपन्नृगनृपतौ
अपि जनिता किं पुनरितरनरे
किञ्चिदनार्जितसुचरितनिकरे - न हरत

अज्ञानापतिता गौ रेतौ
भूसुरनाथौ भृशमनुनीतौ
सुचरितजलनिधिरवनीपाता
तदपीदृशविपदिह बत जाता - न हरत

कृकलासकता जगति निकृष्टा
कृपयैव तयोरजनि विशिष्टा
क्षितिसुरजनता सुरतरुसमिता
मुदिता कुपिता हुतवहसमिता - न हरत

विप्रधने पुनरज्ञानहृते
दोषोऽयमियान् धीपूर्वहृते
क्वचिदपि कथमपि न समाधानं
कलयत तदिदं मिळदवधानम् - न हरत

हेहयराडपि भूतिविमोहा-
न्ननु स पुरा खलु भूसुरमाहां
बहुमतसचिववचा बत हृतवान्
नृपकुलमखिलं लघु संहृतवान् - न हरत

अजरय दशनैर्गिरिशो हि विषं
दुर्जरमखिलैर्ब्रह्मस्वविषं

दहति हि विषमिह परमदनकृतं
ब्रह्मस्वविषं कुलमपि नियतं - न हरत

द्विजवसु यदि दुरनुज्ञापहृतं
पुरुषत्रयमातनुते पतितं
यदि पुनरिह बत बलतोऽपहृतं
दशपूर्वान् दश च परान् नियतं - न हरत

दुरितेरितमतिरिह यो हि पुमा-
न्निजकरदत्तां द्विजवृत्तिमिमां
स्वयमेवापहरेदपि च मितां
शकृति भजेत स शिव शिव कृमितां - न हरत

यावद्रेणुसिचो मुखजतते-
रश्रुकणा धरणौ द्रविणहृतेः
तावद्वर्षशतं द्रविणहरो
निपतति कुंभीपाके स नरो - न हरत

महिसुरवित्तावपराधकरो
महिताधिधरो धरणिपनिकरो
गदविधुरो भवति च गतसुकृतो
विकलतरायू रिपुनृपविजितो - न हरत

विप्रियमिह कल्पयति प्रयता
विप्रसभा जगति हि विप्रकृता
क्षिप्रमसावप्रतिममनल्पं
तत्परिचरतानिशमविकल्पम् - न हरत

श्लोकं

द्रोढुं प्रौढगुणान् महीसुरगणान् मा मा भवन्तो मना-
गीहन्तां मनसापि हन्त शपतो वा निघ्नतो वा क्रुधा
एते जातु कृतापराधविधयोप्याराधनीया जनैर्-
भूदेवेषु निकारकृन्मम भुजादण्डोपि खण्ड्यो भवेत् २४

श्लोकं

मत्का मत्कामसन्पादननिरतधियो निग्रहेऽनुग्रहे वा
दक्षानक्षामवीर्यानविरतमपिनन्दन्तु निन्दन्तु नामून्
किञ्चैतानञ्चनीयान् प्रसभमपि यदा हन्त निन्दन्ति मन्दाः
शापात् तत्कोपजातात् कुलमपि च तदामङ्क्षु वो नङ्क्ष्यतीदम् २५

श्लोकं

दुर्वदानुद्वमन्तौ पितृपतिभटयोस्तुल्यतामुद्वहन्तौ
भूदेवावावहन्तौ भयमखिलनृणां रूक्षमालोकयन्तौ
भूपेनानेन यद्वत् प्रसरदपदकोपान्धितौ स्वान्तितौ तौ
तद्वन्नूनं भवन्तोप्यवनिसुरजनान् सन्ततं स्वान्तयन्तु २६

श्लोकं

नित्यं मर्त्यजनेन तावदमुना वन्द्या हि वृन्दारका
लोकेशो गिरिशोऽपि तैरविरतं वन्द्यौ तयोरन्वहं
वन्द्योसावहमादरेण च सदा वन्द्या मया भूसुरा-
स्तद्वन्द्या भवताममी न खलु चेद्दण्ड्या भवन्तो मया २७

श्लोकं

आबोधयन्निति हितं वचनैरुदारै-
रामोदयन् मृदुलहाससखैरपांगैः

आवासमाप च भवान् नृगधर्मजात-
मामोददायि वदता स्वजनेन साकं २८

मंगलं

केळीलोलमुदारनादमुरळीनाळीनिलीनाधरं
धूळीधूमळकान्तकुन्तळभरव्यासङ्गि पिञ्छाञ्चलं
नाळीकायतलोचनं नवघनश्यामं क्वणत्किङ्किणी-
पाळीदन्तुरपिङ्गलांबरधरं गोपालबालं भजे

# Seven

## विविदवधः

श्लोकं

गोपीलोकेन साकं तदनु विहरमाणे मदान्ते वनान्ते
कालिन्द्यां कामबाणेन च विवशमतौ कामपाले कदाचित्
व्याहिंसीर्वासुदेवं तव सदृशतनुं पौण्ड्रकं काशिपं वा
कृत्यां विद्राव्य काशीपतिसुतमदहत् सालयं ते रथाम्गम् १

पद्यगीतं मुखारि - चेन्पट

धरणीरमणीयमणी रमणी-
रुपनीय वनीमज रैवतके
मदनेन मदेन च मूढमना
मुसली स सलीलमिहारमता १

विविधोपि विभो विपदं विदध-
न्नरकानुचरो नगरे च गृहे
स तदा तु गतोऽजित रैवतकं
समलोकत तं सहयौवतकं २

अबला हि विलोक्य कपिं विटपं
चलयन्तमलं बलवन्तममुं
अहसन्नथ सोऽप्यवरुह्य तरो-
रहरत् सुरनाथ सुराकलशं ३

उपलेन बलेन बलेन बली
निहतोऽमुमवञ्चयदेष जवी
स मदी समदीदृशदीश गुदं
हलिनं ललनाकुलमध्यगतं ४

सतु सम्मुखचिल्लिनिरासमुखैः
सकृतैरथ नाथ निकारशतैः
प्रततप्रतिघस्य पुरो हलिनो
व्यभिनत्तरसा च सुराकलशम् ५

शसितुं स बलो बत गर्दितवान्
मुसलं सहलं सहसोद्धृतवान्
विविधोऽपि विभो तरुमुद्धृतवान्
बलमूर्धनि ताडितवान् बलवान् ६

सहसा स हली सहलीलममुं
स्वहलेन हरे समरे हतवान्
स सुनन्दहतोऽथ बलेन जवात्
तदिहागणयन् द्रुममन्यमधात् ७

अपि तं कुपितो व्यभिनन्मुसली
विपिनं विधते विविधो वितरुं
प्रहृतासु शिलासु हृतासु हली
समताडि करेण हरे हरिणा ८

विधुतायुध आशु करेण हरे
प्रहरन् प्ळवगं स च जत्रुतले

नरकानुगमेव विभो विदधे
विरुजं विततान च विश्वमिदं ९

श्लोकं

सांबं जांबवतीसुतं स कुरुभिर्बद्धं बलो द्वारकां
निन्ये हस्तिनपत्तनादथ भवान् सर्वैः सहार्कग्रहे
तीर्थाग्र्यम् तु समन्तपञ्चकमगात् स्नात्वा च वित्तान्यदात्
सर्वैर्बन्धुभिरावृतः सुखमुवासात्रैव मासत्रयम् २

श्लोकं

आभीरिर्विधुराः पुरेव रमयन्नासां च बोधं दिश-
न्नाश्वास्याथ गिरा पुरीवरमयात् तातं निजं याजयन्
श्रुत्वा मागधरुद्धभूपविपदं सद्यो यियासुर्भवा-
निन्द्रप्रस्तमवाप नारदगिरा पार्थैश्च संभावितः ३

श्लोकं

भीमाद्यैर्भवता विझृंबितबलैर्भूपान् विभोऽजापयो
वाचा धर्मभुवोऽथ मागधमया भीमार्जुनाभ्याममा
धृत्वाशु द्विजरूपमस्य सविधं गत्वा तु तेनार्चितो
युद्धं तावदयाचथाः स च तथेत्युक्त्वा गदामाददे ४

पद्यगीतं - शङ्कराभरणं - चेन्पट

स हि तां सहसाऽदित मारुतये
स हि तां सहसा परिगृह्य परां
समरोचितभूमिमतो गतवान्
सवृकोदरशक्रसुतोऽपि भवान् १

प्रथितौ भुवि मागधवायुसुतौ
युधि तौ कुशलौ दृढबाहुबलौ
कुपितौ तरसाऽथ मिथो घटितौ
द्विरदौ समदाविव घोरगदौ २

विधृतोरुरती विवरावगमे
विविधं च विचेरतुरत्र रणे
विटपस्य विपाटनयारिवधे
विदधाथ नयं विबुधेश मृधे ३

तदवेत्य निपात्य मरुत्तनयो
विनवेश्य तदीयपदे स्वपदं
निजपाणियुजा परमस्य पदं
कलयन्नभिनद् गुदतो बत तं ४

अमुना समुदा तरसा दलिते
जरसा तु पुरा तरसा घटिते
व्यथिता जनता शकले खलु ते
सकला समलोकत लोकपते ५

परिरभ्य वृकोदरमीश भवान्
विजयोऽपि विभो निकटं गतवान्
अधिकं मदयन्नति सम्मदवान्
अपि तं भगवन्नभिनन्दितवान् ६

श्लोकं

भीमेनेति जरासुते युधि हते तेनेह सन्पाशितान्
भूपानाशु विपाश्य भक्तिविवशानाशास्य मुक्तिं मुदा

तत्पुत्रं च जगत्पतेऽथ सहदेवं तत्पदे कल्पयन्
गत्वा तु प्रकृतं वितानमतनोस्त्वं राजसूयमिदं ५

श्लोकं

कृत्वा तास्ताः क्रियाश्च त्वयि खलु विदधे धर्मजन्मा सुजन्मा
तामग्र्यामग्रपूजां सह स तु सहदेवेन कार्यं विचार्य
तुष्टम् चाशेषभूतं बत तदसहमानोऽथ मानी सभायां
प्रोद्यत्प्रोद्दामरोषः श्रवणकटुवचो दामघोषीर्बभाषे ६

पदं १ मलहरि - चेन्प

शिशुपाल

नादेयमपि च नरदेवमपि सहदेव-
मधिकजळबुद्धिमपि धिग्धिगेतान्
तापसानपि मुदितमानसान् भूसुरान्
विनयभरभासुरान् धिग्धिगेतान्

पल्लवं

अपचितिं विरचितामनुचिततमां
कथमेष विषहेत दमघोषजनिरिमां

शिशुनायकं युवतिनायकं बहुनायकं
वृद्धनायकं धिग्धिगेतत्
अपि राज्यतन्त्रमपि च भवतां व्यवसितं
नियतमिह दुर्धियां धिग्धिगेतत् - अपचितिं

अपि सति सभाजने सुमहति सभाजनं
युक्तमिदमस्मिन्न सत्तमे किं
जाति हीने गुणैरपगते निष्क्रिये
युक्तमिदमस्मिन्नसत्तमे किं - अपचितिं

परमातुलाहितवधे लोकबाह्ये च
युक्तमिदमस्मिन्नसत्त्मे किं
कैतवाहितलळितरूपे विरूपके
युक्तमिदमस्मिन्नसत्तमे किं - अपचितिं

निष्किञ्चने निष्परिग्रहे निष्कळे
युक्तमिदमस्मिन्नसत्तमे किं
विहितवृषसंस्थे पृथग्जनकृतार्चने
युक्तमिदमस्मिन्नसत्तमे किं - अपचितिं

कुलयुवतिचारित्रविध्वंसनोत्सुके
युक्तमिदमस्मिन्नसत्तमे किं
यत्स्मरणमपि हन्त परमसुखदायकं
युक्तमिदमस्मिन्नसत्तमे किं - अपचितिं

वचसालमपचितिं न खलु गोपहतके
सिशुपालनरपाल इह सहेत

श्लोकं

कर्णारुन्तुदमस्य वाक्यमशनैराकर्ण्य दीर्णाशया
कर्णौ हन्त पिधाय साधुजनता तूर्णं ततो निर्ययौ
नासौ किञ्चन सञ्चचाल च भवान् पञ्चाननोऽयं यथा

गोमायोरिह निस्वनं निशमयन् भूमातिरेकास्पदम् ७

श्लोकं

दुर्वादानुद्वमन्तम् परुषतरमिति स्वासनादुत्थितं तं
क्रोधोद्भ्रान्तेक्षणान्तोदितदहनकणोद्योतविद्योतिताशं
पश्यन् पार्थान् निवार्य त्वरितमथ भवान् कालचक्रेण चक्रे
लूनग्रीवं निलीनं त्वयि च तदुदितं धाम वेगात् त्रिधामन् ८

श्लोकं

कारुण्यात् ते समाप्ते महति मखवरे विश्वलोके विसृष्टे
सन्तुष्टे वित्तवृष्ट्या जय जय वचनोद्धोषिताशेषलोके
भूपोऽभूत् पूर्णकामो मयरचितसभामाप्तवान् धार्तराष्ट्रो
बभ्रामाथ स्थलांबुभ्रमविवशतरोऽसावसूयाकुलात्मा ९

श्लोकं

पार्षतीमुखसरोरुहे तदा
मारुतेरपि मुखे समुत्थितं
वीक्षितैर्हसितमेधितं व्यधा
बीजभूतमवनीभरक्षतौ १०

श्लोकं

समायातः साल्वो विजयमभिकांक्षी तव मुदा
स मायातः सौभेन तु पुरमभांक्षीदपि तदा
स मानी प्रद्युम्नो यदुभिरमुनायुध्यत बली
समानीकामोदं ददुपगतस्त्वं च सहली ११

श्लोकं

साल्वोऽसौ युध्यतस्ते धनुरजित कराग्रात् किला भ्रंशयत् द्राङ्-
मायातातस्य घातं व्यधित तव पुरो मोहयित्वा किल त्वां
सौभं शंभुप्रसादोदितमथ गदया क्षोभयित्वा भवांस्तं
चक्रेणोत्कृत्तकण्ठं मुरहर गदया दन्तवक्त्रं च चक्रे १२

श्लोकं

द्रौपद्यास्त्वं रुदत्या वसनमनवसानं व्यतानीः सभायां
द्यूते जाते कुरूणां मृढजनुषि मुनावन्धसोऽन्ते क्षुधान्ते
भोक्तुं प्राप्ते वनान्ते द्रुपदनृपसुताचिन्तितोऽभेत्य शाकं
भुक्त्वामुं तृप्तमाधाः कुरुनगरमगा हन्त कौन्तेयदूतः १३

श्लोकं

श्लाघ्ये वाक्ये त्वदीये बत कुरुपतिना धिक्कृते तत्क्षणात् त्वं
विश्वात्मा विश्वरूपं सदसि विशदयन् पाण्डवागारमागाः
विष्णो जिष्णोर्नियन्ता खलनिवहनियन्ता भवानित्थमूचे
पार्थं बुद्ध्वाथ युद्धाल्लघु विरतमतिं सोप्यवादीद् भवन्तं १४

पदं २ कांभोजि - चेन्पट

कृष्ण

त्यज सुमुखाकुलभावं कृष्ण
दृढतरमावह भावम्

रणविरतिर्महिपानां कृष्ण
कथमुचिता महितानाम्

तत् त्यज युधि सन्देहं कृष्ण
तिष्ठ न बत मन्देहम्

रणविधिरतिपृथुबाहो कृष्ण
सुनियतमतिशुभवाहो

अर्जुन

गुरुजनहृदि विशिखानां कृष्ण
निकरं निशितशिखानां
प्रहराम्यपकगतशङ्कं कृष्ण
कथमजिताहितपङ्कम्

विसृजन् गुरुजनघातं कृष्ण
विपिनमितो मुनिजातं
मदयन्निह निवसेयं कृष्ण
मदुदितमिदमवसेयम्

कृष्ण

प्रियसख हत इह को वा कृष्ण
त्रिजगति हन्ता को वा

रहितो विकृतिभिरात्मा कृष्ण
स चराचरभूतात्मा

बाल्ययुवत्वजरा वा कृष्ण
देहे स्युरिह यथा वा
तद्वन्मृतिरपि सेयं कृष्ण
भवतेति व्यवसेयम्

विसृजन् वसनं जीर्णं कृष्ण
नवमयति यथा तूर्णं
तद्वदसाविह देही कृष्ण
देहान्तरमतिमोही

भजति यदीह तु देहं कृष्ण
त्यजतीदमसन्देहम्

व्यसनं विसृज स तत्त्वं कृष्ण
कलयन् मनसि सतत्त्वम्

प्रियसख विधुतविशङ्कं कृष्ण
रणमिह विगतकळङ्कं
धर्म्यमिदं कुरुराज्ञां कृष्ण
सौम्य विधेहि ममाज्ञाम्

श्लोकं

महितार्थगभीरेण परमार्थतरेण च
वल्गुना वचनेनाधाः फल्गुनं प्रथनोत्सुकम् १५

श्लोकं

दुर्वारे वाहिनेये प्रतिदिनमयुतं वाहिनीशे नृपाणां
सांख्ये संहर्तरि क्ष्माभरहतिसहकृत्वन्यधृष्णौ च जिष्णौ
त्यक्त्वा निःशस्त्रतागूं त्वरितमथ रथादुत्पतन्नात्तचक्रो
व्याधावन् क्रोधभारादिव नतशिरसं वीक्ष्य तं विस्मितोऽगाः १६

श्लोकं

द्रोणे नाथे चमूनामिभगतभगदत्तास्तमुग्रं निजास्त्रं
वत्से धत्से स्म चक्रावृततरणिमहाः घातयन् सिन्धुराजं
कर्णास्ते पन्नगास्त्रे भुवमवनमयन् मौलिमात्रावकृत्तं
कृत्त्वा चात्रायथास्त्वं विजयमिह न किं पाण्डवार्थे चकर्थ १७

श्लोकं

तीर्थस्नायी रणादौ मुसलभृदविशन्नैमिशं तत्र सूतं
हत्वाऽनुत्थायिनं तस्य च तनयमथो तत्पदे कल्पयित्वा
व्याहींसीद्बल्कलं पर्वणि विहतमखं भैमदुर्योधनेऽगा-
ज्ज्ञन्ये तन्मन्यमानो दुरुपशममयात् त्वन्निशान्तं च शान्तः १८

श्लोकं

संसुप्तद्रौपदीनन्दनहननकरं द्रौणिमेत्यामुनाऽस्तं
ब्रह्मास्त्रं संजहर्थ त्वरितमहृत पार्थश्च तन्मौलिरत्नं
अस्त्रे सन्तानमन्तं गमयितुमुदरं प्राप्तवत्युत्तराया
आविष्टोऽम्गुष्ठमात्रो मुरहर तरसाऽपालयो बालमेतं १९

श्लोकं

धर्मान् धर्मात्मजायाथ स समुपदिशन् देव देवव्रतोऽग्रे
वीक्षं वीक्षं भवन्तं वपुरिह विजहद् ब्रह्मभूयं बभूवे
विश्वाग्रैरश्वमेधैस्त्रिभिरमलयशोभाजनं याजयित्वा
भूपं तं पूर्णकामं स्वपुरमथ भवानाप्तवानाप्तकामः २०

श्लोकं

दारिद्र्योद्रेकनित्यार्दितनिजदयिताप्रेरितो भूरितोषं
वेगात् तेऽगादगारं पृथुकमथ कुचेले कुचेलो दधानः
आमोदादच्युतालोक्य तमिह सहसै वाच्युतामेयभक्तिं
भूदेवं पूजयित्वा सरसमचकथः शारदामादरात् त्वं २१

पदं ३

कृष्ण

गुरुगृहान्निजगृहानुपगतोऽथ सुदृशं
किमु सखे पुनरुदवहोऽतिसदृशम्

पल्लवं

स्वागतं भवतु तव तापसशिखामणे
साम्प्रतं ब्राह्मतेजोनलमहारणे

स्मरसि किल मानसे वयसि खलु शैशवे
किमसि गुरुमन्दिरे स्थितिमयि कवे - स्वागतं

गुरुवधूशासनादानेतुमिन्धनं
क्वचिदहनि वयमिता घोरविपिनम् - स्वागतं

जलमुचो ववृषुरपि रविरपरपर्वतं
बत गतो जगदजनि तमसाऽऽवृतम् - स्वागतं

अन्योन्यमस्माभिरयि कलितबाहुकं
वन्यासु बत परिभ्रान्तमधिकम् - स्वागतं

उदितवति दिवसकृति गुरुरिदं विदितवान्
विपिनमितवान् वचनमिति गदितवान् - स्वागतं

प्राणाननादृत्य दुःखिता मत्कृते
यूयमिह बत वने केसरिवृते - स्वागतं

महिततरशुभवतां प्रभवतां हि भवतां
भवतां मनोरथो लघु सफलताम् - स्वागतं

एतानि गुरुकुले रचितानि चरितानि
भवता किमयि सखे विस्मृतानि - स्वागतं

श्लोकं

उक्त्वैवं पटखण्डतोऽस्य पृथुकं हृत्वा भवानादराद्
भुक्त्वा मुष्टिमितं च तुष्टिमितवान् भूतिं ददौ भूयसीं
भक्त्या तृप्तमनाः स च स्वसदने स्वर्गोपमे संस्थित-
स्त्वद्ध्यानोद्धुतविश्वपापविसरोमुक्तिं शनैराप्तवान् २२

श्लोकं

लक्ष्मीकान्तं नितान्तं मुदमिह भजतामावहन्तं वहन्तं
कारुण्यं कान्तिमन्तं जगदवनकलालोभवन्तं भवन्तं
अश्रान्तं ये भजन्ते पशुपकुलवधूवल्लभं ते लभन्ते
शान्तिं किञ्चाप्तवन्तः पदमपि परमं तेऽरमन्ते रमन्ते २३

मञ्गाळं

सान्द्रानन्दचिदात्मनि त्वयि विभो सक्षात् परब्रह्मणि
स्वान्तं कान्तधिया निवेश्य रममाणानां रमावल्लभ
गोपीनामगणेयपुण्यविभवानां वर्ण्यते केन वा
तत्तादृग् बत भागधेयमहिमा भक्तैकबन्धो हरे (रसक्रीड - ५४)

# Eight

## स्वर्गारोहणम्

श्लोकं

आचार्यात्मभवाहृतेर्निशमनाज्ञातस्पृहां मातरं
सूनूनामवलोकने मृतवतां षण्णां विषण्णाशयां
पाताळादुपनीयताननितरां दामोदरामोदयो
भूयोऽमूननयो विभो निजपदं पुत्रान् मरीचेः पुरा १

श्लोकं

देवाथ श्रुतदेवमेत्य मिथिलां प्रीत्या महत्या द्विजं
धात्रीशं बहुलाश्वमप्ययि भवानायोजयन्नाययौ
अत्रागाद्विजयो द्विजस्य रुदितं श्रुत्वाऽऽश्रवं चातनो-
न्नानेष्ये यदि बालकं शलभतां नेष्ये तनुं पावके २

श्लोकं

त्रातेऽप्येतेन पोते मुरहर शरकूटेन जाते विनष्टे
सर्वत्रानिष्य मोघोद्यममनलनिपातोद्यतं तं निवार्य
साकं तेनाधिरूढो रथवरमरिणैवान्धकारं निरुन्धन्
गच्छन्निन्धानवेगं निजनगरमगाः कालनाभामिदानम् ३

श्लोकं

दीव्यद्दिव्यास्त्रभूषं महितभुजगभोगे निषण्णं प्रसन्नं

दीव्यन्तं नारदाद्यैरकृतकवचसामर्थमेकम् निगूढं
त्वामेव त्वं पुराणं पुरुषमुपनिषत्सुन्दरीवृन्दवीतं
काळांभोदाभिरामं कृतनतिरिति तुष्टोथ तुष्टोऽथ दृष्ट्व ४

पदं १ कानक्कुरिञ्जि – चेन्प

कृष्ण

जय जय रमारमण जय जय जगत्पते
जय जय धरारमण जय सुरपते

पल्लवं

जय जय जनार्दन मुरार्दन दयालो
जय जय जनार्चित पदाब्जपतयलो

जय जय जगन्निवहपालनाकुलमते
जय जय भुजंगशयनाहितरते - जय जय जनार्दन

जय मकुटतटघटितमणिविजितदिनपते
जय नयनयुगळधूतनळिनवितते - जय जय जनार्दन

जय कमनतरवदन जिततुहिनदीधिते
जय नासिकातुलिततिलसुमतते - जय जय जनार्दन

जय दशनवसन रुचिरुचिररदसंहते
जय मकरकुण्डलोदितरुचितते - जय जय जनार्दन

जय ललितगळकलोल्लसितकौस्तुभमणे
जय गदार्यंबुरुहकंबुपाणे - जय जय जनार्दन

जय विपुलभुजविवरविततहारावले
जय जठरकुहरगतभुवनपाले - जय जय जनार्दन

जय नाभिनळिनगतशतधृते नरहरे
जय जघनवीतपीतांबर हरे - जय जय जनार्दन

जय चरणशिरसिरुहयुगसतततनतयते
जय सजलजलदवरसदृशद्युते - जय जय जनार्दन

श्लोकं

प्रणुवन्तमिति प्रणयाकुलितं
प्रणमन्तमरं प्रमदातिभरं
प्रभवन्तमलं स भवन्तममुं
प्रजगादभवान् प्रततातिमुदा ५

श्लोकं

हे वत्स कृष्ण भृशमस्मदभिन्नरूपौ
हे वत्स फल्गुन युवां परमाभिरूपौ
विश्वेशिनौ भुवनलोभनवेषरूपौ
निश्शेषपापजनताधिकदुर्निरूपौ ६

श्लोकं

आलोकितुं कुतुकवन्त इमौ भवन्ता-
वालोभनीयचरतौ पृथुवीर्यवन्तौ
आनीतवन्त इह हन्त वयं तु पोतान्
मत्पोषितान् नयतमेव निकेतमेतान् ७

श्लोकं

एवं सस्नेहमुक्त्वा मुदितमति वितीर्णानुदिर्णोरुमोदा-
नादायानीय चामूनयि मुरहर तीर्णप्रतिज्ञार्णवेन
सख्या विख्यातधाम्ना पृथुकुतुकवता दारकान् दापयित्वा
भूदेवं पूर्णकामं सपदि समतनोर्वासुदेवादिदेव ८

श्लोकं

सोऽयं देवावतारो जगति विजयते यत्र पापौघहारै-
रेवं ननाविहारैर्जगदभिरमयन् व्यादधानो वितानन्
तैस्तैस्तांस्तानुपायैः स्वपदमुपनयन् संहरन् भूभरं त्वं
ब्रह्मैवाखण्डमंगिकृतमनुजतनुर्व्युद्युतो द्वारवत्याम् ९

श्लोकं

तपस्तप्त्वा दैत्यो वृक इह गिरा नारदमुनेर्-
वरं लब्ध्वा शंभोः शिरसि करमाधाय निधनं
तमेवाधावन्तं बत वर परीक्षार्थमशनै-
रुपायेनाहिंसीस्तमपि भुवनोत्कृष्टमहिमा १०

श्लोकं

सरस्वत्यास्तीरे प्रकृतयजनैस्तापसजनै-
स्त्रयाणां देवानामधिकमिह विज्ञातुमजित
भृगोर्नुन्नस्योग्रां रुषमबहुमानादभजतां
विधीशौ त्वं प्रापः प्रमदमपि तत्पादहननात् ११

श्लोकं

त्वत्तातोऽलब्धबोधं कलहरतमुनेर्द्वारकैकाधिवासा-

न्नष्टप्रायेऽथ सांबाद्यविनयजनिताद् ब्रह्मशापाद्यदूनां
सैन्ये भूभारभूते स्वपदजिगमिषुं त्वां विदित्वा कृतार्थं
विश्लेषार्त्योद्धवोऽभाषत तमपि भवान् भक्तलोकैकबन्धो १२

पदम् २ सामन्तमलहरि - चेन्पट

उद्धव

स्वकुलं मुरहर सकलं हृतवान्
स्वपदं सपदी गमी किमुत भवान्
मुनिशापमिमं मुदमुपगतवान्
विभुरपि यदिहाजित न विहतवान्

पल्लवं

यदुवर नयनोद्धव मम तावन्-
मानसमिह बत सुमहिततापम्

उपनय निजपदमपि जनमेतं
मुरहर निरुपमभावसमेतं
क्षणमपि विरहं तव मम चेतो
न तु बत सहते यदुकुलकेतो - यदुवर

कृष्ण

मम तावदिदं भवताऽभिहितं
प्रियसख हृदये परमभिलषितं
अपि विबुधततेरधुना नियतं
मम निजपदगतमेवानुमतम् - यदुवर

मुनिशापोदितकलहमनूनं

कुलमपि मङ्क्षु विनङ्क्ष्यति नूनं
स्वजने विजहत् प्रेम विमर्शी
मयि कृतमतिरिह चर समदर्शी - यदुवर

उद्धव

प्रणयं बन्धुषु बन्धनहेतुं
विषयी विभुरिह नाथ न हातुं
तदहं तव पदपल्लवमेतं
शरणमुपैमि भवोदधिपोतम् - यदुवर

कृष्ण

द्रुतमशुभततेरुद्धव सुकृती
स्वयमेव स्वमिहोद्धरति कृती
आत्मन आत्मा गुरुरखिलानां
सविशेषं हि सखे मनुजानाम् - यदुवर

प्रत्यक्षादनुमनादपि ते
मर्त्या यन्निजहितमादधते
अवदत पूर्वं बहुमतिपूर्वं
यदुमिदमवधूतो मम पूर्वम् - यदुवर

भागवतोऽनिशमपि च भजन् मा
विषयविरक्तिमुपैति सुजन्मा
उपगतवानिह विषयविरक्तिं
पुरुशमवानुपयाति विमुक्तिम् - यदुवर

उद्धव

के भागवता इति भुवनपते
बोध्योऽहं नतहितलोलुप ते
गदितं भवदाननगळितमृतं
तृप्यति को नु पिबन् गळदमृतम् - यदुवर

कृष्ण

श्लोकं

बोध्यबोधनवैदग्धीधारयामवधारय
उद्धवाधिकपुण्याब्धे भक्तशेखर मे गिरम् १३

पदम् ३ आहरि - चेन्प

ननु सखे मनुजवपुरतिचिरात्मुक्तिदम-
नित्यमपि दुरवाप्यमनघाप्य मयि रतो
जगति यो निखिलभूतेषु मद्भावमुद्-
भावयति भागवतवर एष निगतितो

पल्लवं

बहुदिषण ननु विबुधवरगणशिरोमणे
अवदातमहितनय यदुकुलशिखामणे

मयि महितहार्दमपि भक्तेषु सौहार्द-
मपि सततमज्ञेषु परमकरुणार्दतां
यो विपक्षे पुनरुपेक्षां च वितनुते
भागवतमध्यमोऽयमिति हृदि बुध्यताम् - बहुदिषण

अपचितिं मम तु यो वितनुते प्रतिकृतौ
परमसौ प्राकृतो भागवता ईरितो

नळिनभवमुखविबुध नमसितात् क्षणमपि न
चलति वैष्णववरो मम चरणयुगळतो - बहुदिषण

प्रणयगुणनद्धोऽहमुद्धव न यद्धृदय-
मुज्झामि विद्धि तं भागवतसत्तमं
अखिलमपि मायेति यो निखिलभूतेषु
समदृगयि विद्धि तं भागवतमुत्तमम् - बहुदिषण

धुतपातकानि भृशपावनानि मम ना-
मानि गायन्नयन् भुवनानि स पुनाति
क्वचन मम चिन्तया मोदते क्वचन रो-
दिति हसति गायति स तनुभृतो विनमति - बहुदिषण

मनसैव मम रूपमभिरूपमधिकसुख-
रूपमापीय स तु मुदितोऽनवरतं
जातुचन लोचने विनिमील्य विपिनेऽपि
धावन् न च स्खलेन्न च पतेत् सुनियतम् - बहुदिषण

मायया नविचलितमानसं सर्वदा
मयि रचितलालसं सुकृतचयसागरं
भागवतमनुयामि पादरजसा सखे
पावयितुमात्मानमहमपि च सादरा - बहुदिषण

उद्धव

मन्मतिर्वेदितुं तव महितमायां हि
मायिनामपि हृदयमोहिनीमीहते
त्वामृते हितमिह रमापते सरसमिति
बोधयितुमीश के जगति पुनरीश ते - बहुदिषण

कृष्ण

निर्गुणे निर्मले ब्रह्मणि जगद्भ्रमो
मम तु मायेति भवतोद्धव विबुद्ध्यतां
कलुषितो बत यया कर्माणि काम्यानि
निर्माति लब्धवानपि हृदि विशुद्धताम् - बहुदिषण

निजविहितकर्मफलमनुभवन्निह भवप-
योनिधौ भ्राम्यति सुखेतरं शुभमते
तन्मनुजतां गतो मुक्त्यै यतेत खलु
विषयसुखमिह सखे सर्वतो जायते - बहुदिषण

अन्यथा निजशुभाशुभकर्मजनितानि
तानि तानि बत देहान्तराणि विवशं
समवाप्य शिवशिव भवाप्ययावाप्रळय
मवाप्नुयादाप्यायितार्तिभारमनिशम् - बहुदिषण

उद्धव

स्थूलमतिरधिजगति नाथ कथमतितरति
देव तव महिततरमायां विलोभनीं
इह पुनरनर्हामशिक्षितात्मभिरधो-
क्षज तरितुमपि मायिनामपि विमोहिनीम् - बहुदिषण

कृष्ण

श्लोकं

मायाया मामिकायास्तरणसुनिपुणो पायसारेषु सारं
त्वामद्धा बोधयाम्युद्धव महितमते गोप्यमप्यादरेण

भक्तो भृत्योऽप्यमात्यः सुहृदपि च वयस्योऽपि शिष्योऽपि मे त्वं
किं किं वा देशिकोऽसौ न पुनरुपदिशेदीदृशे शिष्यलोके १४

पदं ४ केदारगौडं - अटन्त

विधानायेह सौख्यानां विघातायापि दुःखानां
अहो लोके प्रवृत्तानां गृहे कृत्यैः प्रमत्तानां
सखे पाके विलोकेथा विपर्यासं विषण्णानां
सदाराणां सदा नृणां सरागाणामशेषाणाम्

पल्लवं

महामाया ममामेया सखे दानवैः
महामोहावहा सर्वैरविज्ञेया यथा देवैः

धनं धान्यं गवां जालं कदंबं बान्धवानां वा
गृहं देहं वधूवृन्दं नृणां मोदं कियन्तं वा
नितान्तं चञ्चलं कुर्यात् कृतान्तास्यं प्रपन्नानां
यथा लोके वधार्हाणां वधस्थानं प्रपन्नानाम् - महामाया

त्रिलोकीचारुरूपां वा विवेकी दारुरूपां वा
प्रमादाज्ञातुचिन्नारीं पदेनापि स्पृशेद्यो वा
सुखे स्वल्पे दुरावेशात् परामृश्याश्नुते बन्धं
करेणूनां करी स्पर्शे दुरावेशाद्यथा बन्धं - महामाया

निशाम्यैनां महामायां ममामेयां विमूढात्मा
तदीयानां विलासानां तदैवायं विधेयात्मा
मया हन्तोपभोग्येति प्रलोभाद्वञ्चितो देहि
पतेच्चाधो निराधारः पतंगोऽग्नौ यथा मोही - महामाया

अतो नारीपिशाचीं नो सुरूपां रूपयेदेनां
व्यलोकीयं दुराशा चेद्विमोहिन्येव लोकानां
न विद्याभिर्विजेतव्या विवेकेनापि योगैर्वा
धनौघैर्वा तपोभिर्वा तथान्यैरप्युपायैर्वा - महामाया

दृशा कामान्धयाऽवश्यं विमूढात्मा दुराशायां
सुखभ्रान्त्याऽधिसर्वस्वे सजत्यस्यां महेळायां
वसामांसासृगादीनां समाहारे नरो लोके
वधूपिण्डेऽप्यहो मोही नखैर्दन्तैर्दुरालोके - महामाया

मुखं पूर्णेन्दुसङ्काशं स्थनौ पीनौ घनौ यूनां
नितंबो वानुभोग्योऽयं सखे सन्पूर्णभाग्यानां
नरो रंरम्यते चैवं शकृन्मूत्राधिकक्लिन्ने
सुबीभत्से श्ववन्मांसे सुदुर्गन्धत्वमापन्ने - महामाया

अलं निन्द्यं यदत्रांगं रतिस्तत्रैव मर्त्यानां
सखे पश्येह मायायाः प्रभावं त्वं विमूढानां
महेळानामहो सम्गात् तथा तत्संगिनां संगाद्-
यथा बन्धो यथा पीडा तथा नैवन्यतः सम्गात् - महामाया

सखे संगम् वितन्यान्नोनृणां शिश्नोदरेहाणां
सतां संगो निधेर्लाभो विधेयः कामधेनूनां
खगा रात्रिञ्चरा दैत्या मृगा वृत्रादयो वाऽन्ये
सुदुष्प्रापात् सतां संगाद्रमन्ते मत्पदे धन्ये - महामाया

वधूसंगं विधूयालं सखे सत्संगिसंगं वा
स्मृतिं मे कीर्तनं नाम्नां मदर्थे सर्वचेष्टां वा
सदा भूतेषु मद्भावं मदात्मत्वेन वा ध्यानं

चरन् मत्कानिमान् धर्मांस्तरेन्मायामिमां नूनम् - महामाया

श्लोकं

ये केचिन्न जितेन्द्रिया ननु जनाः कामाभिभूताशया
लोकेशं न भजन्ति हन्त हृदये भान्तं भवन्तं विभो
एतेषां बत काम्यकर्मनिरतानां का समाप्तिर्नृणा-
मेतद् बोधविधौ मतिर्मम तु वैकुण्ठेयमुत्कण्ठते १५

पदं ५ घण्टारम् – चेन्पट

कृष्ण

प्रियसख मुखबाहूरूपदो मे
वर्णा जाता ननु पूर्वमिमे
तदपि च केचन मां न भजन्ते
निवसन्तं निखिलजनहृदन्ते

पल्लवं

निशमय संशयविसरविदारं
निगदितमिदमतिविशदमुदारम्

अयि मयि विमुखा ये खलु सुमते
कथमपि सविधगता अपि मम ते
निपतन्ति च शिव शिव निजपदतो
निन्दितयोनौ बत नियतमतो - निशमय

कर्मत इह पर ईश्वर इति नो
कोपि भवेदिति नियतात्मानो
जगति गृणन्तो बहु कर्मगुणान्

छलयन्ति च ते बत सूरिगणान् - निशमय

धनकुलविद्यादिभिरुदितमदाः
कामक्रोधवशा जगति सदा
विहसन्ति च बत कर्मसु विरतान्
इह सन्ततमपि ते मयि निरतान् - निशमय

मुहुरपि विलपति बत नियताक्षं
मुरहर मधुमथनेति समक्षं
गुहितुमयमिह निन्दितचरितं
विहसन्त्येवमिमे मयि निरतम् - निशमय

विरसतरैरिह हरिहरचरितैर्-
विफलतरैर्मुहुरमुना गदितैः
अधुना हि विधेयशतं विफलं
प्रलपन्त्यबुधा इति ते सततम् - निशमय

एवमिमे शिव शिव भागवतान्
कर्मपरान् मन्मयभोगरतान्
मामपि बत जगदन्तनिदानं
विहसन्त्यलमिह बहुमहिमानम् - निशमय

अतिलोभपरा धनमेव परं
हृदि निदधत इह निधनैककरं
अपभोजनदक्षिणमविधानं
कथमपि ते विदधति च वितानम् - निशमय

प्रणयाकुलितान् परिचयमसृणान्

विशसन्ति पशूनपि ते कृपणान्
निजसुखलाभे विनिहितधिषणै-
रसुकरमिह किं नृभिरपकरुणैः - निशमय

अविगळकुचसदृगीश्वर इह त-
न्निजकर्मैव फलावहमेतत्
इति कथयन्तो विहसन्ति च तान्
मयि ते तु निवृत्तिपथैकरतान् - निशमय

धुतकर्मततेर्मयि विधृतमतेर्-
मन्मयमयि सुखमिह यदुदयते
तदिदं क्वचिदपि किमुतोदयते
बत कर्मिण उरुविषयैकरतेः - निशमय

विषयैकरता व्यसनैकनिधौ
पतिता बत ते जनिमृतिजलधौ
मयि खलु विमुखा हन्त दुरन्ते
कर्मरता न तु पारमयन्ते - निशमय

उद्धव

श्लोकं

भाषन्तेऽखिलमानुषा हि विषयानापद्गणानां पदं
सेवन्तेऽपि च सावधानमनसो हा हन्त रागान्धिताः
अश्रान्तं श्वखराजवत् परममी विश्रान्तदुःखावहा-
नुद्भ्रान्ताः सुखलेशलोलुपतया नाथैतदेवं कथं १६

कृष्ण

पदं ६ गांबोधि - पञ्चारि

इह विवेकविरहितस्य हृदि यदोदये-
दपि तनावनात्मनि दृढमत्मधीरये
लघु तदा मनो भजति रजोऽतिदारुणं
प्रियसखाऽपि महितसत्त्वगुणविभूषणम्

पल्लवं

देव गुरुमुदानयातिकुशलशुभमते
पादविनतभक्तलोकवृषभ यदुपते

विषमतररजोभिभूतमनसि मानवे
विषयविविदिषापि तदवगमनमपि भवेत्
विषयचिन्तयाथ काममदगजो भृशं
बत विझृंभते विशृंखलं निरङ्कुशम् - देव गुरुमुदा

विविधमपि च काम्यकर्म कामवशगतो
विवशहृदयमनिशमपि च वितनुते ततो
व्यसनदमिदमिति विदन्नपि रजसान्वितो
विसृजति न तु विषयसुखदुराशयान्वितो - देव गुरुमुदा

ध्यायतो हि विषयनिवहमेव मानसं
जायतेऽधिविषयविसरमुदितलालसं
ध्यायतोऽमुमनिशमादरेण मामये
लीयतेऽलमिह मयि खलु परमसुखमये - देव गुरुमुदा

उद्धव

जननमरणजलधिमखिलसुकृतपरिणते
तरितुमुदितरसभरेण नरवरेण ते
स्मरणमरण पदजुषा कथं नु तन्यते

वदतु ननु तदयि भवान् यदीश मन्यते - देव गुरुमुदा

कृष्ण

सावधानमयि सखे शृणुष्व निर्मलं
ध्यानसारमेतदखिलभुवनमंगळं
आदरेण नरवरो यदाचरणरतो
मामकीनपदमुपैति महितमचिरतो - देव गुरुमुदा

आसने समेऽङ्कनिहितबाहुरास्थितो
नासिकाग्रनिहितदृगथ विजितमारुतो
ऊर्ध्वनाळमष्टदळहृदंबुजम् सुखं
चिन्तयेदमूर्ध्ववदनमित्यधोमुखम् - देव गुरुमुदा

बानुसोमदहनमण्डलानि मयि रतो
भावयेदुपर्युपरि च कर्णिकाग्रतो
मां प्रसन्नतरमुखारविन्दकन्दळ-
न्मन्दहासमनलमण्डले स्मरामलम् - देव गुरुमुदा

पादघटकभासुरतरपादयुगळकं
पीतवसनवीतजघनशोभिरशनकं
वत्सलसितवन्यदामहारवरकुलं
निस्तुलाभकौस्थुभादिशोभिगळतलम् - देव गुरुमुदा

दरगदारिकमलकलितशोभकरतलं
मकरकुण्डलाभिरामगण्डमण्डलं
अधरकान्तिमिळितलळितदन्तसमुदयं
भुवनकान्तलोचनान्तवान्तपुरुदयम् - देव गुरुमुदा

बालसोमसमितफालशोभितिलककं
जातरूपमयकिरीटजातसुषमकं
नीलनीरदोपशोभिनिखिलतनुलतं
तेजसापहसितमिहिरहिमकरायुतम् - देव गुरुमुदा

सावधानमिति विचिन्त्य सकलमंगकं
ध्येयमेतदेकमेकमपि ममांगकम्
तत्र लब्दपदमिदं विकृष्य हृदमये
मन्दहाससखमुखाब्ज एव सज्जये - देव गुरुमुदा

पद्यगीतं - पञ्चारि

समवधारितं किं त्वया सखे
सकलवेद्यसारं मयोदितं
जगति विद्यते नामृतोऽधिकं
किमपि वेदितव्यं विवेकिनाम् १

किमु मनो निलीनं तवाधुना
गहनमोहरूपं तमो गतं
विमलबोधरूपो विभाकरो
मनसि चोदितो हन्त किं तव २

न च तथा प्रियो मे पितामहो
न च रमापि नो राम एव वा
न च महेश्वरो नो सुरेश्वरो
न च सखे ममात्मा यथा भवान् ३

उद्धव

सकलतापभारापहारकै-

स्तव विधो विभो गोनिकायकैः
मयि तु संस्थितं मोह संज्ञितं
गमितमीश नाशं तमोऽखिलम् ४

विदितवानिदं त्वन्मुखोदितं
लषति वेदितव्यान्तरं किमु
अमृतमापिबन् किं नरोऽपरं
मुरहरेह पातव्यमीहते ५

कृष्ण

न तु शठाय वा दांभिकाय वै
न तु खलाय वा नास्तिकाय वा
मयि च भक्तिहीनाय वा त्वया
न खलु हे सखे दीयतामिदम् ६

पुरुविरक्तये भूरिभक्तये
लषितमुक्तये धूतसक्तये
सुकृतसद्मने चामलात्मने
सुमहितात्मने दीयतमिदम् ७

अधिवसन् भवान् विश्वपापहं
बदरिकाश्रमं निश्शलाककं
अनुचरन्निदं मन्मुखोदितं
मम परं पदं लप्स्यते सखे ८

श्लोकं

इत्युक्तो भवतोद्धवोऽथ विसरन्नेत्रांबुरुद्धाक्षरो
वक्तुं किञ्चिदशक्नुवन् मुहुरपि त्वत्पादपद्मे पतन्

त्वद्रूपं हृदये निधाय गतवान् प्रेमाकुलो लोकयन्
व्यावृत्यैष पदे पदे तव वपुस्त्रैलोक्यसम्मोहनम् १७

श्लोकं

एवं धन्याग्रगण्ये गतवति शनकैरुद्धवे लब्दबोधे
दृष्ट्वारिष्टं यदूनां विसरमथ विभासं प्रभासं प्रणीय
विप्रानातर्पयोऽथो मधु मधुहर मैरेयमापीय जन्यं
तन्वन्नुन्नैरकम् तद् बलमजनि यदूनां भवन्मात्रशेषम् १८

श्लोकं

तीरे वारमधीशस्य स मुसलधरो योगमास्थाय देहं
तत्याजालोक्य तद्वागखिलजनमनोलोचनानन्दधारां
मूर्तिं स्वां त्यक्तुकामः स्वयमपि च भवान् भूमिभारापहारा-
दानन्दन् नन्दसूनो वरद चलदलस्याविशन्मूलदेशम् १९

श्लोकं

व्याधो विव्याध पादे जर इति जगति ख्यातनामा त्रिधामन्
क्षिप्रं ते विप्रशापप्रभवमुसलशेषप्रणीताशुगेन
त्वत्पादे निष्पतन्तं भयवशमतनोर्निर्जरं तं जरं त्वं
तावत् प्रापत् भवन्तं व्यथितमधिरथो दारुको द्वारकायाः २०

श्लोकं

तार्क्ष्येणाक्षीणशोभस्त्वरितमथ रथस्तूत्पपातोत्पताक-
स्तद्वीक्ष्याक्षामकौतूहलममुमवदस्त्वद्वियोगासहिष्णुं
ज्ञातीनां सूत घातं वद मम पितरावावयोरप्यवस्थां
न स्थेयं द्वारवत्यां ननु जलधिरिमां प्लावयेत् सप्तमेऽह्नि २१

श्लोकं

मद्धर्मैर्मामुपेयास्त्वमिति निगदितेऽस्मिन् परिक्रम्य याते
यान्तं विष्णो स्वधिष्ण्यं दरनळिनगदाचक्रदीप्ताग्रहस्तं
भास्वत्कोटिप्रकाशं परिहित नवपीतांबरं नीरदाभं
देदीव्यद्दिव्यभूषं विलसितवनमाल्यं सुरास्तुष्टुवुस्त्वाम् २२

पदं ४ (अवतारं) सौराष्ट्रं - चेन्पट

बोधमयाव्यय लोकहिताय हि भजसे रूपमनन्तं
यत्स्मरणादपि भवसागरमिह सपदि तरन्ति दुरन्तं

पल्लवं

याम इमे शरणं त्वां यदुवर
याम इमे शरणं त्वां

श्लोकं

संयोज्यात्मानमात्मन्यतिविशदधियां ध्यानगम्यां रमायाः
काम्यां विश्वैकरम्यां त्रिभुवनजनतागीतकीर्तिं स्वमूर्तिं
आदायागाः स्वधाम प्रकटनिजविभूत्या महत्या च भूत्या
क्षित्या युक्तः स तोषे मृदुतळिमविशेषेऽथ शेषे स्म शेषे २३

पदं १० (रासक्रीड) धनाशि - एकताळं

नतवल्लवजनपदतल्लजजित-
नवपल्लवकुल मुरहर जय जय

पल्लवं

नर-नारायण नरकनिवारण

नरकविदारण मुरहर जय जय

श्लोकं

स्फायद्भक्तिभरेण नुन्नमनसा श्रीमानवेदाभिद-
क्षोणीन्द्रेण कृता निराकृतकलिर्ग्राह्या स्तुतिर्गाथकैः
लक्ष्मीवल्लभ कृष्णगीतिरिति विख्याता तवानुग्रहा-
देषा पुष्करलोचनेह पठतां पुष्णातु मोक्षश्रियम् २४

मङ्गळं

केळीलोलमुदारनादमुरळीनाळीनिलीनाधरं
धूळीधूमळकान्तकुन्तळभरव्यासङ्गि पिञ्छाञ्चलं
नाळीकायतलोचनं नवघनश्यामं क्वणत्किङ्किणी-
पाळीदन्तुरपिङ्गलांबरधरं गोपालबालं भजे